## रुचिरा द्वितीयो भागः

# पाठ–1 सुभाषितानि

### अभ्यास प्रश्नोत्तराणि

1. छात्राः शिक्षक सहायतया कुरुत।
2. 

| (क) | (ख) |
|---|---|
| धनधान्यप्रयोगेषु | विद्यायाः संग्रहेषु च । |
| विस्मयो न हि कर्त्तव्यः | बहुरत्ना वसुन्धरा । |
| सत्येन धार्यते पृथ्वी | सत्येन तपते रविः । |
| सद्भिर्विवादं मैत्रीं च | नासद्भिः किञ्चिदाचरेत्। |
| आहारे व्यवहारे च | त्यक्तलज्जः सुखी भवेत् । |

3. **(क)** त्रीणि। **(ख)** पाषाणखण्डेषु।
   **(ग)** सत्येन। **(घ)** सद्भिः।
   **(ङ)** क्षमा।
4. **(क)** केन वाति वायुः?
   **(ख)** कैः सहासीत?
   **(ग)** का बहुरत्ना भवति ?
   **(घ)** कस्याः संग्रहेषु त्यक्तलज्जः सुखी भवेत्?
   **(ङ)** सद्भिः किम् कुर्वीत?
5. **(क)** दाने, तपसि, शौर्ये, विज्ञाने, विनये, नये च विस्मयो न कर्त्तव्यः।
   **(ख)** पृथिव्यां जलमन्नं सुभाषितं च त्रीणि रत्नानि।
   **(ग)** धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु, आहारे-व्यवहारे च त्यक्तलज्जः सुखी भवेत्।
6. 

| पुल्लिङ्ग | स्त्रीलिङ्ग | नपुंसकलिङ्ग |
|---|---|---|
| सुखी | वसुन्धरा | रत्नानि |
| वह्निः | पृथ्वी | सत्येन |
| रविः | सङ्गतिम् | अन्नम् |

7. (i) कृ (ii) दृश् (iii) भू (iv) स्था।

### अन्य महत्वपूर्ण–प्रश्नाः

➔ **वस्तुनिष्ठ प्रश्नोत्तराणि**

(i) स (ii) द (iii) अ (iv) अ (v) ब

➔ **अतिलघूत्तरात्मक प्रश्नाः**

(i) सत्येन (ii) मूढैः (iii) वसुन्धरा (iv) विधिलिङ्ग लकारः (v) षष्ठी विभक्तिः (vi) भवेत्।

➔ **लघूत्तरात्मक प्रश्नाः**

**(i)** वायुः सत्येन वाति, संसारे सर्वं सत्ये एव स्थितम् अस्ति।
**(ii)** लोके क्षमा एव वशीकृतिः अस्ति, क्षमया एव सर्वं साध्यते।
**(iii)** पृथिव्यां अन्नं जलं सुभाषितं त्रीणि रत्नानि सन्ति।
**(iv)** **अन्वयः**– दाने, तपसि, शौर्ये, विज्ञाने विनये नये च विस्मयः न हि कर्त्तव्यः (यतो हि) वसुन्धरा बहुरत्ना (अस्ति)।
**(v)** 'सह' अव्यय योगे तृतीया विभक्तेः प्रयोगः भवति। अतः सद्भिः पदे तृतीया विभक्तिः अस्ति।

●●

# पाठ–2 दुर्बुद्धिः विनश्यति

### अभ्यास प्रश्नोत्तराणि

1. छात्राः शिक्षक सहायतया कुरुत।
2. **(क)** कम्बुग्रीवः। **(ख)** धीवराः।
   **(ग)** आकाशमार्गेण। **(घ)** पौराः।
3. (क) कूर्मः — हंसौ प्रति
   (ख) हंसौ — कूर्मं प्रति
   (ग) कूर्मः — हंसौ प्रति
   (घ) कूर्मः — पौरान् प्रति
4. **(क)** हंसाभ्यां सह कूर्मोऽपि उड्डीयते ।
   **(ख)** अहं किञ्चिदपि न वदिष्यामि ।
   **(ग)** यः हितकामानां सुहृदां वाक्यं न अभिनन्दति ।
   **(घ)** एकः कूर्मः अपि तत्रैव प्रतिवसति स्म।
   **(ङ)** अहम् आकाशमार्गेण अन्यत्र गन्तुम् इच्छामि।
   **(च)** वयं गृहं नीत्वा कूर्मं भक्षयिष्यामः ।
5. **(क)** कच्छपः अन्यं ह्रदं (सरं) गन्तुम् इच्छति।
   **(ख)** कच्छपः उपायं वदति – ''युवां काष्ठदण्डम् एकं चञ्च्वा धारयतम् । अहं काष्ठदण्डमध्ये अवलम्ब्य युवयोः पक्षबलेन सुखेन गमिष्यामि ।''

**(ग)** लम्बमानं कूर्मं दृष्ट्वा पौराः अवदन् – "हंहो! महदाश्चर्यम् । हंसाभ्यां सह कूर्मोऽपि उड्डीयते । यदि अयं कूर्मः निपतति तदा वयं भक्षयिष्यामः" इति ।

**(घ)** कूर्मः मित्रयोः वचनं विस्मृत्य अवदत्– "यूयं भस्म खादत।"

**6. (क)** कूर्मः हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

**(ख)** केचित् धीवराः सरस्तीरे आगच्छन् ।

**(ग)** 'वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः' इति धीवराः अकथयन्।

**(घ)** कूर्मः अन्यत्र गन्तुम् इच्छति स्म ।

**(ङ)** कूर्मः हंसयोः सहायतया आकाशमार्गेण अगच्छत्।

**(च)** लम्बमानं कूर्मं दृष्ट्वा पौराः अधावन् ।

**(छ)** पौराः अकथयन् – वयं पतितं कूर्मं खादिष्यामः।

**(ज)** कूर्मः आकाशात् पतितः पौरैः मारितश्च।

**7.** एकस्य वृक्षस्य शाखासु अनेके काकाः वसन्ति स्म। तस्य वृक्षस्य **कोटरे** एकः सर्पः अपि अवसत् । काकानाम् अनुपस्थितौ **सर्पः** काकानां शिशून् खादति स्म । काकाः **दुःखिताः** आसन् । तेषु एकः **वृद्धः** काकः उपायम् **अचिन्तयत्**। वृक्षस्य **समीपे** जलाशयः आसीत् । तत्र एका राजकुमारी स्नातुं **जलाशयम्** आगच्छति । शिलायां स्थितं तस्याः आभरणम् **आदाय** एकः काकः वृक्षस्य उपरि अस्थापयत् । राजसेवकाः काकम् अनुसृत्य **वृक्षस्य** समीपम् अगच्छन् । तत्र ते तं सर्पं च अमारयन् । अतः एवोक्तम् – उपायेन सर्वं सिद्ध्यति ।

## अन्य महत्वपूर्ण–प्रश्नाः

### ➔ वस्तुनिष्ठ प्रश्नोत्तराणि

(i) (अ) (ii) (ब) (iii) (स) (iv) (अ) (v) (ब)।

### ➔ अतिलघूत्तरात्मक प्रश्नाः

(i) धीवराः (ii) कूर्मः (iii) संकटविकटौ (iv) धीवराणाम् (v) तत् + क्षणम् + एव।

### ➔ लघूत्तरात्मक प्रश्नाः

**(i)** मगधदेशे फुल्लोत्पलनाम सरः आसीत्?

**(ii)** तत्र संकटविकटौ नाम हंसौ निवसतः स्म।

**(iii)** हंसयोः मित्रस्य नाम कम्बुग्रीवः आसीत। (कूर्मः) आसीत्।

**(iv)** लृट् लकारः, मध्यम पुरुषः, एकवचनम्।

**(v)** 'नी' धातुः, 'क्त्वा' प्रत्ययः।

### ➔ निबंधात्मक प्रश्नः

**1.** हंसौ अकथयताम्—''अत्र एकः अपायोऽपि वर्तते। आवाभ्यां नीयमानं त्वामवलोक्य जनाः किञ्चिद् वदिष्यन्ति एव। यदि तवमुत्तरं दास्यसि तदा तव मरणं निश्चितम्।

**2.** मगध देश में फुल्लोत्पल नाम का तालाब था। वहाँ संकट और विकट नामक दो हंस तथा कम्बुग्रीव नामक उनका मित्र कछुआ भी रहता था।

एक बार मछुआरे वहाँ आए और कहने लगे—"कल हम मछली-कछुआ आदि को मारेंगे।" यह सुनकर कछुआ डर गया और दोनों मित्रों से सहायता के लिए प्रार्थना करने लगा।

कछुए ने हंसों को उपाय बताया कि 'वे दोनों एक डण्डे के दोनों किनारों को चोंच से पकड़ लें और वह उस डण्डे के मध्य भाग को मुख से पकड़ लेगा और इस प्रकार वह आराम से चला जायेगा।' कछुए की सलाह मानकर दोनों हंसों ने डण्डे के किनारों को चोंच से पकड़ लिया और कछुआ ने डण्डे के बीच भाग को मुँह से पकड़ लिया और वे दूसरे तालाब में पहुँचने के लिए उड़ने लगे।

रास्ते में कुछ नागरिकों ने इस दृश्य को देखकर, आश्चर्यचकित होकर कहने लगे—'देखो, हंसों के साथ कछुआ भी उड़ रहा है।' उनकी बात सुनकर कछुआ नाराज हो गया। उसने ज्यों ही कुछ कहने के लिए अपना मुँह खोला, त्यों ही वह पृथ्वी पर गिर गया और नागरिकों ने उसे मार दिया।

●●

# पाठ-3 स्वावलम्बनम् (आत्म-निर्भरता)

## अभ्यास प्रश्नोत्तराणि

1. छात्राः शिक्षक सहायतया कुरुत।
2. **(क)** श्रीकण्ठस्य भवने सर्वविधानि सुखसाधनानि आसन्।

**(ख)** कृष्णमूर्तेः गृहे कोऽपि भृत्यः नास्ति ।

**(ग)** श्रीकण्ठस्य आतिथ्यं कृष्णमूर्तिः तस्य माता पिता च अकुर्वन्।

**(घ)** स्वावलम्बने सर्वदा सुखम्।

**(ङ)** श्रीकण्ठः कृष्णमूर्ते गृहं प्रातः नववादने अगच्छत्।

**(च)** कृष्णमूर्तेः अष्टौ कर्मकराः सन्ति ।

3. (क) अष्टादश (18) (अठारह)
(ख) एकविंशतिः (21) (इक्कीस)
(ग) पञ्चदश (15) (पन्द्रह)
(घ) षट्त्रिंशत् (36) (छत्तीस)
(ङ) चतुर्विंशतिः (24) (चौबीस)
(च) त्रयत्रिंशत् (33) (तैतीस)

4. (28) अष्टाविंशतिः (अट्ठाईस)
(27) सप्तविंशतिः (सत्ताईस)
(30) त्रिंशत् (तीस)
(31) एकत्रिंशत् (इकतीस)
(24) चतुर्विंशतिः (चौबीस)
(40) चत्वारिंशत् (चालीस)
(50) पञ्चाशत् । (पचास)

5. (क) एषः कृषकः क्षेत्रं कर्षति ।
(ख) एतौ कृषकौ खननकार्यम् कुरुतः।
(ग) एते कृषकाः धान्यं रोपयन्ति ।

6. 5.00 पञ्चवादनम् (पाँच बजे)
7.00 सप्तवादनम् (सात बजे)
3.30 सार्धत्रिवादनम् (साढ़े तीन बजे)
2.30 सार्धद्विवादनम् (ढाई बजे/साढ़े दो बजे)
9.00 नववादनम् (नौ बजे)
11.00 एकादशवादनम् (ग्यारह बजे)
12.30 सार्धद्वादशवादनम् (साढ़े बारह बजे)
4.30 सार्धचतुर्वादनम् (साढ़े चार बजे)
8.00 अष्टवादनम् (आठ बजे)
1.30 सार्धैकवादनम् (डेढ़ बजे/साढ़े एक बजे)
7.30 सार्धसप्तवादनम् (साढ़े सात बजे)

7. (क) **षड्** ऋतवः भवन्ति ।
(ख) मासाः **द्वादश** भवन्ति ।
(ग) एकस्मिन् मासे **त्रिंशत्** अथवा **एकत्रिंशत्** दिवसाः भवन्ति।
(घ) फरवरी मासे सामान्यतः **अष्टाविंशतिः** दिनानि भवन्ति।
(ङ) मम शरीरे **द्वौ** हस्तौ स्तः।

## अन्य महत्वपूर्ण-प्रश्नाः

### ➔ वस्तुनिष्ठ प्रश्नोत्तराणि

(i) (अ) (ii) (ब) (iii) (स) (iv) (अ) (v) (ब)।

### ➔ अतिलघूत्तरात्मक प्रश्नाः

(i) श्रीकण्ठः (ii) अष्टादश। (iii) कृष्णमूर्तेः (iv) तृतीया। (v) क्त्वा।

### ➔ लघूत्तरात्मक प्रश्नाः

**(i)** कृष्णमूर्तेः गृहम् आडम्बररहितं साधारणञ्च आसीत्।

**(ii)** श्रीकण्ठस्य आतिथ्यं कृष्णमूर्तिः तस्य माता पिता च स्वशक्त्या अकुर्वन्।

**(iii)** श्रीकण्ठः अवदत्–''मित्र तव वचनानि श्रुत्वा मम मनसि महती प्रसन्नता जाता। अधुना अहमपि स्वकार्याणि स्वयमेव कर्तुम् इच्छामि।''

**(iv)** तेन पदे तृतीया विभक्तिः अस्ति। सह योगे तृतीया विभक्तिः भवति।

**(v)** 'विशाले' विशेषण पदं भवने विशेष्य पदं च।

### ➔ निबंधात्मक प्रश्नाः

1. श्रीकण्ठस्य भवने सर्वविधानि सुख-साधनानि आसन् । तस्मिन् विशाले भवने चत्वारिंशत् स्तम्भाः आसन् । तस्य अष्टादश-प्रकोष्ठेषु पञ्चाशत् गवाक्षाः चतुश्चत्वारिंशत् द्वाराणि, षट्त्रिंशत् विद्युत्-व्यजनानि च आसन् । तत्र दश सेवकाः निरन्तरं कार्यं कुर्वन्ति स्म।
2. कृष्णमूर्तिः अवदत् – "मित्र ! ममापि अष्टौ कर्मकराः सन्ति । ते च द्वौ पादौ, द्वौ हस्तौ, द्वे नेत्रे, द्वे श्रोत्रे इति। एते प्रतिक्षणं मम सहायकाः । किन्तु तव भृत्याः सदैव सर्वत्र च उपस्थिताः भवितुं न शक्नुवन्ति । त्वं तु स्वकार्याय भृत्याधीनः । यदा यदा ते

अनुपस्थिताः तदा तदा त्वं कष्टम् अनुभवसि। स्वावलम्बने तु सर्वदा सुखमेव, न कदापि कष्टं भवति ।"

**3.** कृष्णमूर्ति एवं श्रीकण्ठ दो मित्र थे। श्रीकण्ठ के पिता समृद्ध थे। उसके घर में सभी प्रकार के सुख-साधन थे। उसके विशाल भवन में चालीस खम्भे थे। अठारह कमरे थे। उन अठारह कमरों में पचास खिड़कियाँ थीं।
कृष्णमूर्ति के माता-पिता साधारण किसान थे। उनका घर दिखावों से रहित एवं साधारण था। एक बार श्रीकण्ठ कृष्णमूर्ति के घर आया। वहाँ कृष्णमूर्ति एवं उसके माता-पिता ने उसका आदर-सत्कार किया। उसके घर में एक भी नौकर को न देखकर श्रीकण्ठ ने कहा–'तुम्हारे घर में एक भी नौकर नहीं है। मेरे घर में तो अनेक नौकर हैं।'
यह सुनकर स्वावलम्बी कृष्णमूर्ति ने कहा–'मेरे आठ नौकर हैं और वे हैं–दो पैर, दो हाथ, दो आँख तथा दो कान। ये हर क्षण मेरे अधीन रहते हैं। परन्तु तुम्हारे नौकर हमेशा कार्य नहीं कर सकते।' अतः तुम अपने कार्य के लिए नौकरों के अधीन हो। यह सुनकर श्रीकण्ठ अत्यधिक प्रसन्न हुआ और कहने लगा–'आज से मैं भी अपना कार्य स्वयं करूँगा।'

●●

## पाठ–4 पण्डिता रमाबाई

### अभ्यास प्रश्नोत्तराणि

**1.** **(क)** रमाबाई। **(ख)** स्वमातुः।
**(ग)** विपिनबिहारीदासेन सह।
**(घ)** नारीणाम्। **(ङ)** इंग्लैण्डदेशम्।

**2.** **(क)** <u>कस्याः</u> पिता समाजस्य प्रतारणाम् असहत?
**(ख)** <u>कस्य</u> मरणानन्तरं रमाबाई महाराष्ट्रं प्रत्यागच्छत्?
**(ग)** रमाबाई <u>कुत्र</u> 'शारदा-सदनम्' अस्थापयत्?
**(घ)** 1922 तमे ख्रिष्टाब्दे <u>कस्याः</u> निधनम् अभवत्?
**(ङ)** <u>के</u> शिक्षां लभन्ते स्म ?

**3.** **(क)** रमाबाई स्त्रीणां कृते वेदादीनां शास्त्राणां शिक्षायै आन्दोलनं प्रारब्धवती।
**(ख)** निःसहायाः स्त्रियः आश्रमे मुद्रण-टङ्कण- काष्ठकलादीनाञ्च प्रशिक्षणं लभन्ते स्म ।
**(ग)** लेखनक्षेत्रे रमाबाई महोदयाः योगदानम् अस्ति।
**(घ)** 'स्त्री-धर्मनीति' 'हाई कास्ट हिन्दू विमेन' इति रचनाद्वयेन रमाबाई प्रशंसिता वर्तते।

**4.**

| | | | | |
|---|---|---|---|---|
| पिता | पितृ | पुल्लिङ्गम् | प्रथमा | एकवचनम् |
| शिक्षायै | शिक्षा | स्त्रीलिङ्गम् | चतुर्थी | एकवचनम् |
| कन्याः | कन्या | स्त्रीलिङ्गम् | प्रथमा | बहुवचनम् |
| नारीणाम् | नारी | स्त्रीलिङ्गम् | षष्ठी | बहुवचनम् |
| मनोरमया | मनोरमा | स्त्रीलिङ्गम् | तृतीया | एकवचनम् |

**5.**

| | | | | |
|---|---|---|---|---|
| कुर्वन्ति | कृ | लट् | प्रथमपुरुषः | बहुवचनम् |
| आगच्छत् | गम् | लङ् | प्रथमपुरुषः | एकवचनम् |
| निवसन्ति | नि+वस् | लट् | प्रथमपुरुषः | बहुवचनम् |
| गमिष्यति | गम् | लृट् | प्रथमपुरुषः | एकवचनम् |
| अकरोत् | कृ | लङ् | प्रथमपुरुषः | एकवचनम् |

**6.** (क) 1858 तमे ख्रिष्टाब्दे रमाबाई जन्म अलभत।
(ख) सा स्वमातुः संस्कृतशिक्षां प्राप्तवती।
(ग) रमाबाई-महोदयायाः विपिन-बिहारीदासेन सह विवाहः अभवत्।
(घ) सा उच्चशिक्षार्थम् इंग्लैण्डदेशं गतवती।
(ङ) सा मुम्बई नगरे 'शारदा-सदनम्' अस्थापयत्।
(च) 1922 तमे ख्रिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्।

### अन्य महत्वपूर्ण–प्रश्नाः

➔ **वस्तुनिष्ठ प्रश्नोत्तराणि**

(i) (अ) (ii) (ब) (iii) (द) (iv) (अ) (v) (ब)।

➔ **अतिलघूत्तरात्मक प्रश्नाः**

(i) अनन्तशास्त्री डोंगरे। (ii) अनन्तशास्त्री डोंगरे। (iii) लेखनक्षेत्रे (iv) सप्तमी। (v) लट् लकार।

➔ **लघूत्तरात्मक प्रश्नाः**

(i) तस्मिन् काले स्त्रीशिक्षायाः स्थितिः चिन्तनीया आसीत्।

(ii) डोंगरे रूढ़िबद्धां धारणां परित्यज्य स्वपत्नीं संस्कृतमध्यापयत्।

(iii) शारदा-सदने स्त्रियः मुद्रण-टंकण-काष्ठकलादीनाञ्च प्रशिक्षणं लभन्ते स्म।

(iv) षष्ठी विभक्तिः एकवचनम्।

(v) लट् लकारः प्रथम पुरुषः, बहुवचनम्।

➔ **निबंधात्मक प्रश्नाः**

(i) रमा अमरीकादेशे भारतस्य विधवास्त्रीणां सहायतार्थं अर्थसञ्चयम् अकरोत्। भारतं प्रत्यागत्य मुम्बई नगरे सा 'शारदा-सदनम्' अस्थापयत्। अस्मिन् आश्रमे निस्सहायाः स्त्रियः निवसन्ति स्म। तत्र स्त्रियः मुद्रण-टङ्कण-काष्ठकला दीनाञ्च प्रशिक्षणमपि लभन्ते स्म। परम् इदं सदनं पुणेनगरे स्थानान्तरितं जातम्। तत्र पुणेनगरस्य समीपे केडगाँव स्थाने 'मुक्तिमिशन' नाम संस्थानं तया स्थापितम्। अत्र अधुना अपि निराश्रिताः स्त्रियः ससम्मानं जीवनं यापयन्ति।

(ii) तस्मिन् काले स्त्रीशिक्षायाः स्थिति चिन्तनीया आसीत्। स्त्रीणां कृते संस्कृतशिक्षणं प्रायः प्रचलितं नासीत्। किन्तु अनन्तशास्त्री रूढिबद्धां धारणां परित्यज्य स्वपत्नीं संस्कृतमध यापयत्। एतदर्थं सः समाजस्य प्रतारणाम् अपि असहत। अनन्तरं रमा अपि स्वमातुः संस्कृतशिक्षां प्राप्तवती।

(iii) समाजसेवायाः अतिरिक्तं लेखनक्षेत्रे अपि तस्याः महत्वपूर्ण अवदानम् अस्ति। 'स्त्रीधर्मनीति' 'हाई कास्ट हिन्दू विमेन' इति तस्याः प्रसिद्धं रचना द्वयं वर्तते।

(iv) रमाबाई संस्कृत और वेदों की विदुषी थी। उसका जन्म सन् 1858 में अनन्तशास्त्री डोंगरे और लक्ष्मीबाई के घर हुआ था। वह भ्रमण करते हुए कोलकाता पहुँची। संस्कृत की विद्वता के कारण वह 'पण्डिता' और 'सरस्वती' आदि उपाधियों से विभूषित हुईं। रमाबाई ने अपनी माता से संस्कृत की शिक्षा प्राप्त की थी। उसके माता-पिता और बड़ी बहन अकाल से पीड़ित होकर मृत्यु को प्राप्त हो गए। रमाबाई ने अपने बड़े भाई के साथ सम्पूर्ण देश की पैदल यात्रा की। वह भ्रमण करते हुए कोलकाता पहुँची। संस्कृत की विद्वता के कारण उसने वहाँ ब्रह्म समाज से प्रभावित होकर वेदों का अध्ययन किया।

सन् 1880 में उसने विपिन बिहारी दास से विवाह किया परन्तु डेढ़ वर्ष बाद उसके पति का देहान्त हो गया। उसने स्त्री शिक्षा और उनके सम्मान के लिए अपना जीवन अर्पित कर दिया। रमाबाई उच्च शिक्षा के लिए इंग्लैण्ड गई। रमाबाई ने अमेरिका में विधवा स्त्रियों की सहायता के लिए धन इकट्ठा किया। भारत लौटकर मुम्बई नगर में उसने शारदा-सदन की स्थापना की। इस सदन में स्त्रियाँ छपाई, टाइप और लकड़ी के काम आदि का प्रशिक्षण लेती थीं। बाद में इस संस्था को पुणे नगर में स्थानान्तरित कर दिया। उसने पुणे के पास केडगाँव नामक स्थान पर 'मुक्ति मिशन' नामक संस्थान की स्थापना की। जिसमें बेसहारा स्त्रियाँ सम्मान से जीवन बिताती हैं।

सन् 1922 में रमाबाई का निधन हो गया। परन्तु स्त्री शिक्षा और समाज-सेवा में उनका योगदान कभी नहीं भुलाया जा सकता है। समाज सेवा के अतिरिक्त लेखन क्षेत्र में भी उनका महत्वपूर्ण योगदान है।

●●

# पाठ-5 सदाचारः

## अभ्यास प्रश्नोत्तराणि

1. छात्र स्वयं करें ।
2. (क) आम् (ख) न (ग) आम् (घ) न (ङ) आम्।
3. (क) मृत्युः। (ख) सर्वदा। (ग) सत्यम्। (घ) मित्रेण (ङ) आलस्यम्।
4. **(क)** कः न प्रतीक्षते ?
   **(ख)** किं कृत्वा नरः दुःखी भवति ?
   **(ग)** कम् कर्मणा सेवेत ?
   **(घ)** व्यवहारे का श्रेयसी ?
   **(ङ)** कदा व्यवहारे ऋजुता विधेया ?
5. (क) सत्यं प्रियं च ब्रूयात् ।
   (ख) मनसा मातरं पितरं च सेवेत ।
   (ग) अनृतं प्रियं च न ब्रूयात् ।
   (घ) व्यवहारे सर्वदा औदार्यं स्यात् ।
   (ङ) श्रेष्ठजनं कर्मणा सेवेत ।
   (च) व्यवहारे कदाचन कौटिल्यं न स्यात् ।
   (छ) वाचा गुरुं सेवेत ।
   (ज) सत्यम् अप्रियं च न ब्रूयात् ।
6. (क) भक्तः सदा ईश्वरं स्मरति ।
   (ख) असत्यं न वक्तव्यम् ।
   (ग) प्रियं च सत्यं वदेत् ।
   (घ) लता मेधा तथा विद्यालयं गच्छतः ।
   (ङ) अपि कुशली भवान् ?
   (च) महात्मागान्धी कदाचन अहिंसां न अत्यजत् ।
7. (क) सः शिक्षकः कक्षायाम् श्यामपट्टे प्रश्नम् लिखति।
   (ख) छात्राः पुस्तिकायाम् उत्तराणि लिखन्ति।
   (ग) ते श्यामपट्टम् पश्यन्ति।

## अन्य महत्वपूर्ण–प्रश्नाः

➔ **वस्तुनिष्ठ प्रश्नोत्तराणि**

(i) (अ) (ii) (ब) (iii) (द) (iv) (अ) (v) (ब)।

➔ **अतिलघूत्तरात्मक प्रश्नाः**

(i) पारम्पर्य क्रमागतः। (ii) मृत्युः। (iii) यो मित्रेण सह कलहं न करोति। (iv) अस् धातुः (v) तृतीया।

➔ **लघूत्तरात्मक प्रश्नाः**

**(i)** आलस्यं अस्माकं शरीरे तिष्ठति।
**(ii)** मृत्युः कृतं न वा कृतम् इति न प्रतीक्षते ।
**(iii)** मित्रेण सह कलहस्य निवारणं प्रयासेन कुर्वीत।
**(iv)** 'परिवर्जयेत्' पदे विधिलिङ् लकारः, प्रथम पुरुषः, एकवचनम् अस्ति।
**(v)** मित्रेण पदे तृतीया विभक्तिः एकवचनम्।

➔ **निबंधात्मक प्रश्नाः**

**I. (i)** श्रेष्ठं जनं, गुरुं मातरम् च तथा पितरम् अपि सदा सततं मनसा वाचा (च) कर्मणा सेवेत।
**(ii)** प्रियं सत्यं ब्रूयात् । अप्रिय सत्यं न ब्रूयात्। प्रियम् अनृतं च न ब्रूयात् । एषः (एव) सनातनः धर्मः ।

**II. (i)** इस श्लोक में यह बताया गया है कि आलस्य मनुष्य का सबसे बड़ा शत्रु होता है और परिश्रम के समान कोई अन्य मित्र नहीं होता है।
**(ii)** इस श्लोक में बताया है कि मित्र के साथ झगड़ा करके व्यक्ति कभी भी सुखी नहीं रह सकता। अतः मनुष्य को प्रयत्नपूर्वक ऐसा व्यवहार करने से बचना चाहिए।

●●

# पाठ-6 सङ्कल्पः सिद्धिदायकः

## अभ्यास प्रश्नोत्तराणि

**1.** छात्राः शिक्षक सहायतया कुरुत।

**2. (क)**

| | | |
|---|---|---|
| पूजति स्म | **पूजयतः स्म** | **पूजयन्ति स्म** |
| **रक्षति स्म** | रक्षतः स्म | **रक्षन्ति स्म** |
| चरति स्म | **चरतः स्म** | **चरन्ति स्म** |
| **करोति स्म** | **कुरुतः स्म** | कुर्वन्ति स्म |

**(ख)**

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | **अपूजयत्** | अपूजयताम् | अपूजयन् |
| प्रथमपुरुषः | अरक्षत् | **अरक्षताम्** | **अरक्षन्** |

**(ग)**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मध्यमपुरुषः | **अपूजयः** | अपूजयतम् | **अपूजयत्** |
| मध्यमपुरुषः | अचरः | **अचरतम्** | अचरत |

**(घ)**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| उत्तमपुरुषः | अलिखम् | अलिखाव | अलिखाम |
| उत्तमपुरुषः | अरचयम् | अरचयाव | अरचयाम् |

**3.** **(क)** हिंस्रपशवः। **(ख)** गौरीशिखरम्।
**(ग)** शिवः। **(घ)** पार्वती।
**(ङ)** शिवः।

**4.**

| | **कः/का** | **कम्/काम्** |
|---|---|---|
| **(क)** | पार्वती | मातरम् |
| **(ख)** | पार्वती | विजयाम् |
| **(ग)** | विजया | पार्वतीम् |
| **(घ)** | शिवः | पार्वतीम् |
| **(ङ)** | वटुः (शिवः) | पार्वतीम् |
| **(च)** | शिवः | पार्वतीम् |

**5.** **(क)** अरे वाचाल ! अपसर । जगति न कोऽपि शिवस्य यथार्थं स्वरूपं जानाति। यथा त्वमसि तथैव वदसि ।

**(ख)** यः निन्दां करोति सः तु पापभाग् भवति एव, यः शृणोति सोऽपि पापभाग् भवति।

**(ग)** पार्वती तपः कर्त्तुम् ऐच्छत् ।

**(घ)** पार्वती विजयया साकं गौरीशिखरं गच्छति।

**6.** शिलायां – प्रस्तरे (शिला पर, पाषाण पर)
पशवः – जन्तवः (पशु, जानवर)
अम्बा – माता (जननी)
नेत्राणि – नयनानि (नेत्र, आँख)
तूष्णीम् – मौनम् (चुप)

**7.** (क) अपश्यत् (ख) अतपत्
(ग) अचिन्तयत् (घ) अवदत्
(ङ) अगच्छत्

**यथा—अलिखत् = लिखति स्म।**
(क) अकथयत् = कथयति स्म।
(ख) अनयत् = नयति स्म।
(ग) अपठत् = पठति स्म।
(घ) अधावत् = धावति स्म।
(ङ) अहसत् = हसति स्म।

## अन्य महत्वपूर्ण–प्रश्नाः

➔ **वस्तुनिष्ठ प्रश्नोत्तराणि**

(i) (अ) (ii) (ब) (iii) (द) (iv) (अ) (v) (ब)।

➔ **अतिलघूत्तरात्मक प्रश्नाः**

(i) पतिरूपेण। (ii) मेना। (iii) शिवः। (iv) तत्पुरुषः समासः। (v) कदापि।

➔ **लघूत्तरात्मक प्रश्नाः**

**(i)** मनस्वी कदापि धैर्यं न परित्यजति।

**(ii)** पार्वत्याः मनः लक्ष्यं प्राप्तुम् आकुलितम् आसीत्।

**(iii)** चतसृषु दिक्षु अग्निम् आधाय सूर्यस्य निर्निमेषदर्शनं पञ्चाग्निव्रतम् अस्ति।

**(iv)** 'त्रीणि' इति विशेषण पदं, 'नेत्राणि' इति विशेष्य पदम्।

**(v)** विहसति।

➔ **निबंधात्मक प्रश्नः**

**(i)** पार्वती मनसा वचसा कर्मणा च तपः अकरोत्। तस्याः तपः प्रभावात् हिंस्रपशवोऽपि तस्याः सखायः जाताः । सा पञ्चाग्नि व्रतम् अतपः। सा वेदं अधीवती, यज्ञं सम्पादितवती। सा अपर्णा इति नाम्ना अपि प्रथिता।

**(ii)** वटुः उपहसन् अवदत्—शिवः नाम्ना शिवः अन्यथा अशिवः। श्मशाने वसति। यस्य त्रीणि

नेत्राणि, वसनं व्याघ्रचर्म, अङ्गराग: चिताभस्म, परिजनाश्च भूतगणा:।

**(iii)** पार्वती शिवं पतिरूपेण अवाञ्छत्। एतदर्थं सा तपस्यां कर्तुम् ऐच्छत्। सा स्वकीयं मनोरथं मात्रे न्यवेदयत्। तत् श्रुत्वा माता मेना चिन्ताकुला अभवत्।

**(iv)** इस पाठ में यह बताया गया है कि दृढ़ इच्छाशक्ति से किए गए कार्य में सिद्धि मिलती है। कथा का सार इस प्रकार है—

नारद के वचन से प्रभावित होकर पार्वती शिवजी को पति के रूप में पानी चाहती थी इसके लिए तपस्या करने की इच्छा की। पार्वती की माता मेना उसके तप करने की इच्छा से चिन्तित हुई और कहने लगीं कि मनचाहे देवता तुम्हारे घर में ही हैं। तप कठिन होता है तुम्हारा कोमल शरीर है। कठोर तप के लिए अनुकूल नहीं है। अत: घर में ही रहकर तुम्हारी इच्छा पूर्ण होगी।

पार्वती ने अपनी माता को विश्वास दिलाया कि शिव को पति रूप में पाने की इच्छा तो तप से ही पूरी होगी अत: अपने दृढ़ संकल्प को बताती है और इच्छा पूर्ण होने पर पुन: घर लौट आएगी। इसके पश्चात् पार्वती गौरी पर्वत शिखर पर जाकर मन, वचन एवं कर्म से तप करने लगी। पार्वती रात्रि को कभी नंगी भूमि पर और कभी शिला (चट्टान) पर सोती थी। उसके तप के प्रभाव से हिंसक पशु भी उसके मित्र बन गए।

पार्वती ने पंचाग्नि व्रत भी तपा, वेदों का अध ययन किया। यज्ञ सम्पन्न किये। तप के कारण पार्वती का 'अपर्णा' नाम जगत में प्रसिद्ध हो गया। इस प्रकार कठोर तपस्या की। कुछ समय पश्चात् एक ब्रह्मचारी उसके आश्रम में आया। ब्रह्मचारी ने पार्वती का कुशलक्षेम पूछने के बाद उससे तपस्या का उद्देश्य जानना चाहा। पार्वती की सहेली विजया ने ब्रह्मचारी को तपस्या का प्रयोजन बताया जिसे सुनकर वह हँसने लगा।

तब ब्रह्मचारी ने शिव की निंदा करते हुए शिव को अवगुणों की खान कहा—शिव तो श्मशान में रहते हैं और भूतप्रेत उनके परिवारीजन हैं। इसलिए तुम शिव को पतिरूप में पाने की इच्छा छोड़ दो।

शिव की निन्दा सुनकर पार्वती क्रोधित हो गई। वह ब्रह्मचारी को बुरा-भला कहकर वहाँ से जाने के लिए कहने लगी। ब्रह्मचारी के व्यवहार से दु:खी होकर पार्वती वहाँ से जाने के लिए तैयार हो गई। तब शिव ने अपने वास्तविक रूप में जाकर पार्वती से कहा कि ब्रह्मचारी के रूप में मैं ही शिव हूँ। मैं तुम्हारी तपस्या और संकल्प से प्रसन्न हूँ। यह सुनकर पार्वती अत्यधिक प्रसन्न हो गई।

## पाठ–7 त्रिवर्ण: ध्वज:

### अभ्यास प्रश्नोत्तराणि

**1.** (क) आम् (ख) न (ग) आम् (घ) न (ङ) आम् ।

**2.**

| पदानि | विभक्ति: | वचनम् |
|---|---|---|
| समृद्धे: | षष्ठी | एकवचनम् |
| वर्णानाम् | षष्ठी | बहुवचनम् |
| उत्साहस्य | षष्ठी | एकवचनम् |
| नागरिकै: | तृतीया | बहुवचनम् |
| सात्विकताया: | षष्ठी | एकवचनम् |
| प्राणानाम् | षष्ठी | बहुवचनम् |
| सभायाम् | सप्तमी | एकवचनम् |

**3.** (क) त्रय:।
(ख) केशरवर्ण:।
(ग) प्रगते:।
(घ) स्वाधीनताया: गौरवस्य च।

**4.** **(क)** अस्माकं ध्वजस्य श्वेतवर्ण: सात्विकताया: शुचिताया: च द्योतक:।
**(ख)** अशोकस्तम्भ: सारनाथे स्थित: अस्ति।
**(ग)** त्रिवर्णध्वजस्य उत्तोलनं स्वतन्त्रतादिवसे गणतंत्रदिवसे च भवति।
**(घ)** अशोकचक्रे चतुर्विंशति: अरा: सन्ति।

5. (क) अस्माकं क: विश्वविजयी भवेत् ?
(ख) स्वधर्मात् किं वयं न कुर्याम ?
(ग) एतत् सर्वम् अस्माकं नेतृणां कस्याः सत्फलम्?
(घ) केषां समक्षं विजयः सुनिश्चितः भवेत्?

6.

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| अग्निशिखा | सप्तमी | अग्निशिखायाम् | **अग्निशिखयोः** | **अग्निशिखाषु** |
| सभा | चतुर्थी | **सभायै** | सभाभ्याम् | **सभाभ्यः** |
| अहिंसा | द्वितीया | अहिंसाम् | **अहिंसे** | **अहिंसाः** |
| सफलता | पञ्चमी | **सफलतायाः** | सफलताभ्याम् | **सफलताभ्यः** |
| सूचिका | तृतीया | सूचिकया | **सूचिकाभ्याम्** | **सूचिकाभिः** |

7.

| (क) | (ख) |
|---|---|
| केशरवर्णः | शौर्यस्य त्यागस्य च सूचकः। |
| हरितवर्णः | सुषमायाः उर्वरतायाः च सूचकः। |
| अशोकचक्रम् | प्रगतेः न्यायस्य च प्रवर्तकम्। |
| त्रिवर्णः ध्वजः | स्वाधीनतायाः राष्ट्रगौरवस्य च प्रतीकः। |
| त्रिवर्णध्वजस्य स्वीकरणम् | 22 जुलाई 1947 तमे वर्षे जातम्। |

## अन्य महत्वपूर्ण–प्रश्नाः

### ➔ वस्तुनिष्ठ प्रश्नोत्तराणि

(i) (अ) (ii) (ब) (iii) (द) (iv) (अ) (v) (ब)।

### ➔ अतिलघूत्तरात्मक प्रश्नाः

(i) केचन बालकाः बालिकाश्च। (ii) देवेशः। (iii) इदम् अशोकचक्रं कथ्यते। (iv) षष्ठी बहुवचनम्। (v) नपुंसकलिङ्गम्।

### ➔ लघूत्तरात्मक प्रश्नाः

(i) केचन बालकाः काश्चन बालिकाश्च स्वतन्त्रता-दिवसस्य ध्वजारोहण समारोहे गच्छन्ति स्म।

(ii) स्वतन्त्रतादिवसे विद्यालयेषु विद्यालयानां प्राचार्याः ध्वजस्य उत्तोलनं कुर्वन्ति।

(iii) ध्वजस्य अधः स्थितः हरितवर्णः समृद्धेः, वसुन्धरायाः सुषमायाः उर्वरतायाश्च द्योतकः।

(iv) षष्ठी विभक्तिः एकवचनम्।

(v) प्रथम पुरुषः बहुवचनम्।

### ➔ निबंधात्मक प्रश्नः

एक विद्यालय में स्वतंत्रता दिवस के ध्वजारोहण समारोह में सम्मिलित होने के लिए जाते हुए कुछ छात्र परस्पर वार्तालाप कर रहे हैं। आज स्वतन्त्रता दिवस है। विद्यालय के प्रधानाचार्य ध्वजारोहण करेंगे। इस अवसर पर छात्र सांस्कृतिक कार्यक्रम प्रस्तुत करेंगे। छात्रों को बाद में मिठाई भी बाँटी जाएगी।

हमारे देश का झण्डा तिरंगा कहलाता है, क्योंकि इसमें तीन रंग हैं। केसरिया, सफेद एवं हरा। सबसे ऊपर केसरिया रंग शौर्य का (वीरता का), बीच में श्वेत सफेद रंग सत्य का एवं नीचे हरा रंग समृद्धि (सम्पन्नता) का सूचक है।

इन रंगों का अन्य महत्व भी है। ध्वज में स्थित केसरिया रंग त्याग और उत्साह का सूचक है। मध्य में स्थित सफेद रंग सात्विकता और पवित्रता का सूचक है। हरा रंग धरती की सुन्दरता तथा उर्वरता (उपजाऊ) होने का सूचक है।

झण्डे के बीच में नीले रंग का चक्र है, यह अशोक चक्र कहलाता है। यह अशोक चक्र न्याय और प्रगति (उन्नति) का प्रवर्तक है। सारनाथ में अशोक स्तम्भ है। उससे ही यह चक्र ग्रहण किया गया है।

इस चक्र में 24 तीलियाँ हैं। भारत की संविधान सभा में 22 जुलाई, 1947 को झण्डे

को सम्पूर्ण रूप से स्वीकार किया गया है। यह तिरंगा झण्डा हमारी स्वतन्त्रता एवं राष्ट्र गौरव का प्रतीक है। इसलिए स्वतन्त्रता दिवस और गणतन्त्र दिवस के अवसर पर झण्डा फहराया जाता है।

●●

## पाठ–8 अहमपि विद्यालयं गमिष्यामि

### अभ्यास प्रश्नोत्तराणि

1. छात्राः शिक्षक सहायतया कुरुत।
2. (क) दर्शना (ख) अष्टवर्षदेशीया (ग) मौलिकः (घ) करतलवादनसहितम्।
3. **(क)** अष्टवर्षदेशीया दर्शनायाः पुत्री गृहस्य संपूर्ण कार्यं कर्तुं समर्थाऽसीत्।
   **(ख)** दर्शना पञ्च-षड्गृहाणां कार्यं करोति स्म।
   **(ग)** मालिनी स्वप्रतिवेशनीं प्रति कथयति यत् तस्याः पुत्रः मालुतगृहं प्रति प्रस्थितः काचिद् अन्यां कामपि महिलां कार्यार्थं जानासि तर्हि प्रेषय।
   **(घ)** अद्यत्वे छात्राः विद्यालये शिक्षा, गणवेषं, पुस्तकानि, पुस्तकस्यूतम्, पादत्राणम्, माध्याह्नभोजनम् छात्रवृत्तिम् इत्यादिकं सर्वमेव निःशुल्कं प्राप्नुवन्ति।
4. **(क)** का द्वारमुद्घाटयति?
   **(ख)** शिक्षा केषां मौलिकः अधिकारः?
   **(ग)** दर्शना आश्चर्येण कां पश्यति?
   **(घ)** दर्शना तस्याः पुत्री च मिलित्वा कस्य भरपोषणं कुरुतः स्म।
5. (क) ग्रामम् + प्रति, (ख) कार्य + अर्थम्, (ग) करिष्यति + ऐषा, (घ) स्व + उदरपूर्त्तिः, (ङ) अपि + एवम्।
6. **(अ)**

| | |
|---|---|
| आश्चर्येण | विस्मयेन |
| उल्लासेन | प्रसन्नतया |
| परिवारस्य | कुटुम्बस्य |
| अध्ययनस्य | पठनस्य |
| कालः | समयः |

**(ब)**

| | |
|---|---|
| क्रेतुम् | विक्रेतुम् |
| श्वः | ह्यः |
| ग्रामम् | नगरम् |
| समीपस्थम् | दूरस्थम् |
| पृच्छति | कथयति |

7.

| | |
|---|---|
| सर्वेषाम् | बालकानाम् |
| मौलिकः | अधिकारः |
| एषा | अल्पवयस्का |
| सर्वकारीयम् | विद्यालयम् |
| समीपस्थे | विद्यालये |
| सर्वासाम् | बालकानाम् |
| निःशुल्कम् | गणवेषम् |

### अन्य महत्वपूर्ण–प्रश्नाः

**➔ वस्तुनिष्ठ प्रश्नोत्तराणि**

(i) (अ) (ii) (ब) (iii) (द) (iv) (स) (v) (अ)

**➔ अतिलघूत्तरात्मक प्रश्नाः**

(i) गिरिजायाः। (ii) गिरिजायाः सहायिका। (iii) अहं विद्यालयं गमिष्यामि। अहमपि पठिष्यामि। (iv) क्त्वा। (v) तृतीया विभक्तिः एकवचनम्।

**➔ लघूत्तरात्मक प्रश्नाः**

**(i)** दर्शनायाः पुत्री उल्लासेन सह नृत्यति।
**(ii)** दर्शना प्रातः षट्वादने स्वसुतया सह मालिनी-गृहं आगच्छति।
**(iii)** मालिनी दर्शनायै शिक्षायाः मौलिक अधिकारस्य विषये ज्ञापयति।
**(iv)** पतिः कर्तृपद, करोति इति क्रिया पदम् अस्ति।
**(v)** 'सः' इति कर्तृ पदमस्ति, प्रस्थितः इति क्रिया पदमस्ति।

**➔ निबंधात्मक प्रश्नाः**

**(i)** शिक्षायाः मौलिकाधिकारस्य अनुसारेण सर्वकारीय विद्यालयेषु निःशुल्कं पुस्तकानि, पुस्तकस्यूतम्, पादत्राणम्, गणवेषं मध्यान्हेभोजनम् इत्यादीनि मिलन्ति।
**(ii)** मालिनी अपनी पड़ोसन गिरिजा से कामवाली (महरी/बाई) को भेजने के लिए कहती है।

अगले दिन, सुबह छः बजे गिरिजा की महरी दर्शना अपनी लगभग आठ वर्ष की पुत्री के साथ मालिनी के घर पहुँचती है। वह मालिनी से अपनी पुत्री को उसके यहाँ काम पर रखने का आग्रह करती है। किंतु मालिनी उस छोटी बच्ची को काम पर रखने में संकोच करती है। वह दर्शना को अपनी पुत्री को पढ़ाने की सलाह देती है। दर्शना उसे अपने अभावग्रस्त जीवन और बीमार पति के विषय में बताती है। वह मालिनी से कहती है इस बढ़ती महँगाई और अभाव के समय में वह अपनी पुत्री की पढ़ाई, विद्यालय की पोशाक, किताबें, शुल्क आदि का खर्चा नहीं उठा सकती है। तब मालिनी उसे शिक्षा के मौलिक अधिकार की जानकारी देती है। वह दर्शना को बताती है कि शिक्षा सभी बालक-बालिकाओं का मौलिक अधिकार है। वह कहती है कि सन् 2009 में सरकार ने सभी बालक-बालिकाओं के लिए शिक्षा के मौलिक अधिकार की घोषणा की थी, जिसके अनुसार चौदह वर्ष तक के सभी बालक पास स्थित किसी भी सरकारी विद्यालय में न केवल मुफ्त शिक्षा प्राप्त कर सकेंगे अपितु उन्हें मुफ्त विद्यालय की पोशाक, किताबें, किताब रखने का थैला, जूते, दोपहर का भोजन और छात्रवृत्ति भी दी जाएगी। दर्शना को मालिनी की बातें सुनकर बहुत आश्चर्य होता है। वहीं उसकी पुत्री विद्यालय जाने की खुशी से नाचने लगती है। वे दोनों इस जानकारी के लिए मालिनी को धन्यवाद देती हैं।

●●

# पाठ–9 विश्वबन्धुत्वम्

## अभ्यास प्रश्नोत्तराणि

1. छात्राः शिक्षक सहायतया कुरुत।
2. स्वकीयम् - आत्मानम्　अपहाय - त्यक्त्वा
   अवरुद्धः - बाधितः　समृद्धम् - सम्पन्नम्
   कुटुम्बकम् - परिवारः　कष्टम् - दुःखम्
   अन्यस्य - परस्य　निखिले - सम्पूर्णे।
3. (क) छात्राः क्रीडाक्षेत्रे **कन्दुकेन** क्रीडन्ति।
   (ख) **ताः** बालिकाः मधुरं गायन्ति।
   (ग) अहं **पुस्तकालयात्** पुस्तकानि आनयामि। (घ) **तव** किं नाम?
   (ङ) **गुरवे** नमः
4. | | |
   |---|---|
   | शत्रुतायाः | — मित्रतायाः |
   | उदारचरितानाम् | — लघुचेतसाम् |
   | पुरा | — अधुना |
   | सुखिनः | — दुःखिनः |
   | मानवाः | — दानवाः |
   | अपहाय | — गृहीत्वा |
5. 

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| बन्धुः | पुल्लिंग | प्रथमा | एकवचनम् |
| देशान् | पुल्लिंग | द्वितीया | बहुवचनम् |
| घृणायाः | स्त्रीलिंग | षष्ठी/पञ्चमी | एकवचनम् |
| कुटुम्बकम् | नपुंसकलिंग | प्रथमा/द्वितीया | एकवचनम् |
| रक्षायाम् | स्त्रीलिंग | सप्तमी | एकवचनम् |
| ज्ञान विज्ञानयोः | नपुंसकलिंग | षष्ठी/सप्तमी | द्विवचनम् |

6. (क) कृष्णम् (ख) मन्दिरम् (ग) गुरवे (घ) अश्वस्य ।
7. (क) हरये (ख) ग्रामम् (ग) अम्बायै (घ) मञ्चस्य (ङ) पितरम् ।

## अन्य महत्वपूर्ण–प्रश्नाः

➔ **वस्तुनिष्ठ प्रश्नोत्तराणि**

(i) (अ) (ii) (ब) (iii) (द) (iv) (अ) (v) (ब)।

➔ **अतिलघूत्तरात्मक प्रश्नाः**

(i) बन्धुः। (ii) परस्पर सहायतायाः। (iii) वैरभावम्। (iv) अपि। (v) ल्यप्।

➔ **लघूत्तरात्मक प्रश्नाः**

**(i)** उत्सवे, व्यसने, दुर्भिक्षे, राष्ट्रविप्लवे, दैनन्दिनव्यवहारे च यः सहायतां करोति सः बन्धुः भवति।

**(ii)** यदा मानवाः परस्परं सहायतां कुर्वन्तु तदा विश्व बन्धुत्वं सम्भवति।

**(iii)** यदा एकः देशः अपरेण देशेन सह निर्मलेन हृदयेन बन्धुतायाः व्यवहारं करिष्यति।

**(iv)** अनीयर्।

**(v)** 'ते' इति कर्तृ पदं, 'गणयन्ति' इति क्रिया पदं।

➔ **निबंधात्मक प्रश्नः**

**(i)** विश्वस्य कल्याणाय अस्माकं भावना "वसुधैव कुटुम्बकम्" इति भवेत्। यथा सूर्यः चन्द्रः प्रकृतिश्च सर्वेषु समत्वेन व्यवहरन्ति। तथैव अस्माभिः सर्वैः परस्परं वैरभावं अपहाय विश्वबन्धुत्वं स्थापनीयम्।

**(ii)** इस पाठ में 'भाईचारे की भावना' पर विशेष जोर दिया गया है।

उत्सव में, व्यक्तिगत संकट में, अकाल पड़ने पर, देश पर मुसीबत आने पर और प्रतिदिन के व्यवहार में जो सहायता करता है, वही मित्र होता है। यदि विश्व में सब जगह ऐसा भाव आ जाए तो विश्व में भाई-चारा सम्भव है।

परन्तु अब सम्पूर्ण संसार में कलह और अशान्ति का वातावरण है। मनुष्य आपस में एक-दूसरे पर विश्वास नहीं करते हैं। वे दूसरे के कष्ट को अपना कष्ट नहीं समझते हैं। समर्थ देश असमर्थ देश के प्रति उपेक्षा का भाव दिखाते हैं तथा उनके ऊपर अपना प्रभुत्व स्थापित करते हैं। इसलिए संसार में सब जगह द्वेष, शत्रुता और हिंसा की भावना दिखाई देती है। देश के विकास में भी बाधा आती है।

अतः यह बड़ी आवश्यकता है कि एक-दूसरे देश के साथ शुद्ध हृदय से भाई-चारे का व्यवहार करें। यदि संसार में यह भावना लोगों में बलवती हो जाए तो विकसित और अविकसित देशों के बीच स्वस्थ स्पर्धा होगी। सभी देश ज्ञान-विज्ञान के क्षेत्र में मित्रता की भावना और सहयोग से समृद्धि को प्राप्त करने में समर्थ हो जाएँगे।

प्रकृति भी सभी प्राणियों से समान रूप से व्यवहार करती है। अतः आपस के बैरभाव को छोड़कर विश्व के कल्याण के लिए ऐसी भावना होनी चाहिए—'यह अपना है अथवा पराया है' ऐसी सोच तो छोटे हृदय वालों की होती है। उदार हृदय वालों के लिए तो सम्पूर्ण पृथ्वी ही परिवार है।

●●

## पाठ–10 समवायो हि दुर्जयः

### अभ्यास प्रश्नोत्तराणि

**1.** (क) चटका। (ख) गजः। (ग) शुण्डेन। (घ) मक्षिकायाः। (ङ) मेघनादः मण्डूकः।

**2.** **(क)** कालेन <u>कस्याः</u> संततिः जाता ?

**(ख)** चटकायाः <u>किं</u> भुवि अपतत्?

**(ग)** <u>कस्य</u> वधेनैव मम दुःखम् अपसरेत्?

**(घ)** काष्ठकूटः <u>कया</u> गजस्य नयने स्फोटयिष्यति?

**3.** (क) स्फोटयिष्यति (ख) करिष्यामि (ग) गमिष्यति (घ) पतिष्यति (ङ) अनयत् (च) त्रोटयति।

**4.** **(क)** चटकायाः विलापं श्रुत्वा काष्ठकूटः ताम् अपृच्छत्— "भद्रे! किमर्थं विलपसि ?"

**(ख)** तयोः वार्तां श्रुत्वा मक्षिका अवदत्– "ममापि मित्रं मण्डूकः मेघनादः अस्ति । शीघ्रं तमुपेत्य यथोचितं करिष्यामः।"

**(ग)** मेघनादः मक्षिकाम् अवदत्– "मक्षिके! प्रथमं त्वं मध्याह्ने तस्य गजस्य कर्णे शब्दं कुरु, येन सः नयने निमील्य स्थास्यति ।"

**(घ)** चटका अवदत्– "एकेन दुष्टेन गजेन मम सन्ततिः नाशिता । तस्य गजस्य वधेनैव मम दुःखम् अपसरेत्।

**5. (क)**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| प्रथमपुरुषः | **पतिष्यति** | पतिष्यतः | **पतिष्यन्ति** |
| प्रथमपुरुषः | **मरिष्यति** | **मरिष्यतः** | मरिष्यन्ति |

| | | | | |
|---|---|---|---|---|
| (ख) | मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| | मध्यमपुरुषः | **धाविष्यसि** | धाविष्यथः | **धाविष्यथ** |
| | मध्यमपुरुषः | **क्रीडिष्यसि** | **क्रीडिष्यथः** | क्रीडिष्यथ |
| (ग) | उत्तमपुरुषः | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |
| | उत्तमपुरुषः | **हसिष्यामि** | हसिष्यावः | **हसिष्यामः** |
| | उत्तमपुरुषः | **द्रक्ष्यामि** | **द्रक्ष्यावः** | द्रक्ष्यामः |

6. अपठत् – पठति स्म।
   अपृच्छत् – पृच्छति स्म।
   अत्रोटयत् – त्रोटयति स्म।
   अवदत् – वदति स्म।
   अपतत् – पतति स्म ।
   अनयत् – नयति स्म ।

7. (क) **एका** बालिका मधुरं गायति ।
   (ख) **चत्वारः** कृषकाः कृषिकर्माणि कुर्वन्ति।
   (ग) **तानि** पत्राणि सुन्दराणि सन्ति।
   (घ) धेनवः दुग्धं **ददति**।
   (ङ) वयं संस्कृतम् **अपठाम** ।

## अन्य महत्वपूर्ण–प्रश्नाः

### ➔ वस्तुनिष्ठ प्रश्नोत्तराणि

(i) (अ) (ii) (ब) (iii) (द) (iv) (अ) (v) (ब)

### ➔ अतिलघूत्तरात्मक प्रश्नाः

(i) भुवि। (ii) गजेन। (iii) मेघनादः मण्डूकः। (iv) तस्मिन् + एव। (v) ल्यप् प्रत्यय।

### ➔ लघूत्तरात्मक प्रश्नाः

**(i)** चटकायाः नीडं भुवि अपतत्। तेन अण्डानि विशीर्णानि।

**(ii)** एकदा कश्चित् प्रमत्तः गजः वृक्षस्य अधः आगत्य तस्य शाखां शुण्डेन अत्रोटयत्।

**(iii)** चटका काष्ठकूटश्च मक्षिकया सह गत्वा मेघनादस्य पुरः सर्वं वृत्तान्तं न्यवेदयताम्।

**(iv)** 'स्थास्यामि' पदे लृट् लकारः, उत्तमपुरुषः एकवचनम् अस्ति।

**(v)** मध्याह्ने पदे सप्तमी विभक्तिः एकवचनम् अस्ति।

### ➔ निबंधात्मक प्रश्नाः

**(i)** मेघनादः चटकां, वीणारवां काष्ठकूटं च अवदत्– "यथाहं कथयामि तथा कुरुतम्। मक्षिके ! प्रथमं त्वं मध्याह्ने तस्या गजस्य कर्णे शब्दं कुरु, येन सः नयने निमील्य स्थास्यति। तदा काष्ठकूटः चञ्च्वा तस्य नयने स्फोटयिष्यति। एवं सः गजः अन्धः भविष्यति। तृषार्तः सः जलाशयं गमिष्यति। मार्गे महान् गर्तः अस्ति। तस्य अन्तिके अहं स्थास्यामि शब्दं च करिष्यामि। मम शब्देन तं गर्तं जलाशयं मत्वा स तस्मिन्नेव गर्ते पतिष्यति मरिष्यति च।

**(ii)** 'संघे शक्तिः' इति लोकोक्तेः अनुसारेण येन प्रकारेण चटका, काष्ठकूटः, मक्षिका मण्डूकश्च गजस्य समक्षं निर्बला सन्ति परञ्च एतेषां समवायो गजं हन्तुम् सफलः भवति तथैव लौकिक व्यवहारे अपि भवति। बहूनाम् अपि असाराणम् शक्तिशाली नरं अपि जेतुं समर्थः भवति। अतः कदाचित शक्तेः दुरुपयोगं न कर्त्तव्यम्। अकारण एव शत्रुता न कर्त्तव्यम्।

●●

# पाठ–11 विद्याधनम्

## अभ्यास प्रश्नोत्तराणि

1. (क) आम् (ख) न (ग) आम् (घ) न (ङ) आम् ।

2.

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | पुल्लिङ्ग | षष्ठी | एकवचनम् |
| गुरूणाम् | पुल्लिङ्ग | षष्ठी | बहुवचनम् |
| केयूराः | पुल्लिङ्ग | प्रथमा | बहुवचनम् |
| कीर्तिम् | स्त्रीलिंग | द्वितीया | एकवचनम् |
| भूषणानि | नपुंसकलिङ्ग | प्रथमा/ द्वितीया | बहुवचनम् |

3.

| | |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | विद्याविहीनः पशुः। |
| केयूराः न विभूषयन्ति पुरुषम् | हारा न चन्द्रोज्ज्वलाः। |
| न चौरहार्यं न च राजहार्यम् | न भ्रातृभाज्यं न च भारकारि। |

सत्कारायतनं कुलस्य रत्नैर्विना भूषणम् ।
महिमा
वाण्येका समलङ्करोति या संस्कृता धार्यते ।
पुरुषम्

4. (क) विद्याविहीन:। (ख) विद्या। (ग) केयूरा:। (घ) विद्या। (ङ) भूषणानि।

5. **(क)** विद्याविहीन: क: पशु: अस्ति ?
**(ख)** का राजसु पूज्यते?
**(ग)** चन्द्रोज्ज्वला के पुरुषं न अलङ्कुर्वन्ति?
**(घ)** क: हिते नियुङ्क्ते।
**(ङ)** विद्याधनं कीदृशं धनमस्ति?
**(च)** विद्या कासु कीर्तिं तनोति?

6. **(क)** विद्या गुरूणां गुरु: अस्ति ।
**(ख)** संस्कृतावाणी पुरुषं समलङ्करोति।
**(ग)** व्ययं कृते विद्या वर्धते ।
**(घ)** भाग्यक्षये विद्या आश्रय: ।

7.

| | | |
|---|---|---|
| मूर्धजा: | विद्या | धनम् |
| पशु: | संस्कृता | सततम् |
| गुरु: | रति: | कुसुमम् |

### अन्य महत्वपूर्ण-प्रश्नाः

**➔ वस्तुनिष्ठ प्रश्नोत्तराणि**

(i) (अ) (ii) (ब) (iii) (द) (iv) (अ) (v) (ब)।

**➔ अतिलघूत्तरात्मक प्रश्नाः**

(i) विद्या प्रच्छन्नगुप्तं धनम् अस्ति।
(ii) राजसु विद्या पूज्यते।
(iii) विदेशगमने विद्या बन्धु: इव भवति।
(iv) विभूषयन्ति पदे लट्लकार:, प्रथमपुरुष: बहुवचनम्।
(v) 'भूषणानि' पदे प्रथमा विभक्ति:, बहुवचनं नपुंसकलिङ्गम् अस्ति।

**➔ लघूत्तरात्मक प्रश्नाः**

(i) अन्यं सर्वविषयम् उपेक्ष्य विद्याधिकारं कुर्यात्।
(ii) प्रच्छन्नगुप्तं धनं विद्या अस्ति।
(iii) विद्यां तृतीयं नेत्रं कथ्यते।
(iv) षष्ठी तत्पुरुष:।
(v) न + अलङ्कृता।

**➔ निबंधात्मक प्रश्नाः**

**(i)** (एतद् विद्या धनं) न चौरहार्यं न च राजहार्यं, न भ्रातृ भाज्यं न च भारकारि। व्यये कृते नित्यं वर्धत एवं (अत:) विद्या धनं सर्वधनप्रधानं (अस्ति)।

**(ii)** **भावार्थ:** अस्मिन् श्लोके अपि कवि: विद्याया: महत्त्वं वर्णयति यत्-विद्या नरस्य रूपम् अधिकं सौन्दर्यम् वा अस्ति। विद्या मनुष्यस्य हृदये प्रच्छन्नं गुप्त धनम् अस्ति। विद्या भोगम् प्रददाति, यश: सुखं च प्रदात्री अस्ति। विद्या गुरूणां गुरु अस्ति विदेशगमने विद्या बन्धुजन: इव भवति। विद्या परा देवता अस्ति। राजसु विद्या पूज्यते धनं न हि। विद्या विहीन: मनुष्य: पशु: तुल्यं भवति।

●●

## पाठ-12 अमृतं संस्कृतम्

### अभ्यास प्रश्नोत्तराणि

1. छात्रा: शिक्षक सहायतया कुरुत।

2. (क) संस्कृतभाषा। (ख) आर्यभट:। (ग) अर्थशास्त्रम्। (घ) संस्कृतभाषाया:। (ङ) सूक्तय:।

3. **(क)** सङ्गणकस्य कृते सर्वोत्तमा भाषा संस्कृतभाषा अस्ति।
**(ख)** संस्कृतस्य वाङ्मयं वेदै: पुराणै:, नीतिशास्त्रै: चिकित्साशास्त्रादिभिश्च समृद्धम् अस्ति।
**(ग)** संस्कृतं सर्वभूतेषु आत्मवत् व्यवहारं कर्त्तुं शिक्षयति।
**(घ)** संस्कृतभाषायां महापुरुषाणां मति:, उत्तमजनानां धृति:, सामान्यजनानां जीवनपद्धति: च वर्णिता: सन्ति । अत: अस्माभि संस्कृतम् अवश्यमेव पठनीयम्।

4.

| | | | |
|---|---|---|---|
| मति (प्रथमा) | **मतिः** | **मती** | मतयः |
| प्रीति (द्वितीया) | **प्रीतिम्** | प्रीती | प्रीतीः |
| शान्ति (तृतीया) | **शान्त्या** | **शान्तिभ्याम्** | शान्तिभिः |
| प्रकृति (चतुर्थी) | **प्रकृत्यै/प्रकृतये** | प्रकृतिभ्याम् | **प्रकृतिभ्यः** |
| गीति (पञ्चमी) | **गीत्याः/गीत्येः** | गीतिभ्याम् | गीतिभ्यः |
| कृति (षष्ठी) | **कृतेः/कृत्याः** | **कृत्योः** | कृतीनाम् |
| भीति (सप्तमी) | भीतौ/ **भीत्याम्** | **भीत्योः** | **भीतिषु** |

5. (क) संस्कृते ज्ञान-विज्ञानयोः <u>कः</u> सुरक्षितः अस्ति ?
(ख) संस्कृतमेव <u>कस्य</u> कृते सर्वोत्तमा भाषा ?
(ग) शल्यक्रियायाः वर्णनं <u>कुत्र</u> अस्ति ?
(घ) <u>कान्</u> प्रति अस्माभिः प्रियं व्यवहर्त्तव्यम् ?

6.

| पदानि | विभक्तिः | वचनम् |
|---|---|---|
| गतिः | प्रथमा | एकवचनम् |
| नीतिम् | द्वितीया | एकवचनम् |
| सूक्तयः | प्रथमा | बहुवचनम् |
| शान्त्या | तृतीया | एकवचनम् |
| प्रीत्यै | चतुर्थी | एकवचनम् |
| मतिषु | सप्तमी | बहुवचनम् |

7.

| क | ख |
|---|---|
| कौटिल्येन | अर्थशास्त्रं रचितम् । |
| चिकित्साशास्त्रे | चरकसुश्रुतयोः योगदानम्। |
| शून्यस्य आविष्कर्ता | आर्यभटः । |
| संस्कृतम् | ज्ञानविज्ञानपोषकम् । |
| सूक्तयः | अभ्युदयाय प्रेरयन्ति । |

## अन्य महत्वपूर्ण–प्रश्नाः

### ➔ वस्तुनिष्ठ प्रश्नोत्तराणि

(i) (अ) (ii) (ब) (iii) (द) (iv) (अ) (v) (ब)

### ➔ अतिलघूत्तरात्मक प्रश्नाः

(i) कालिदासम् (ii) आर्यभटस्य।
(iii) संस्कृतग्रन्थेषु।
(iv) संस्कृतस्य ग्रन्थेषु (तत्पुरुष समास)
(v) इति + आदयः।

### ➔ लघूत्तरात्मक प्रश्नाः

**(i)** संस्कृते विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति।
**(ii)** वसुधैव कुटुम्बकम् अस्ति।
**(iii)** भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।
**(iv)** ज्ञानं च विज्ञानं च (ज्ञान और विज्ञान)
द्वन्द्व समासः (द्वन्द्व समास)
**(v)** सु + उक्तयः (दीर्घ सन्धिः)।

### ➔ निबंधात्मक प्रश्नाः

**(i)** संस्कृत भाषायाः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रेः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदासादीनां विश्वकवीनां काव्यसौन्दर्यम् अनुपम्। कौटिल्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमम् आर्यभटः अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्व प्रसिद्धम्। संस्कृते यानि अन्यानि शास्त्राणि विद्यन्ते तेषु वास्तुशास्त्रं, रसायनशास्त्रं, खगोलविज्ञानं, ज्योतिषशास्त्रं, विमानशास्त्रम् इत्यादीनि उल्लेखनीयानि।

**(ii)** संस्कृते विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति। कश्चिद् सूक्तयः—

(i) न चौरहार्यं न च राजहार्यं, न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं, विद्याधनं सर्वधनप्रधानम् ।।

(ii) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥

(iii) सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥

(iv) दाने तपसि शौर्ये च विज्ञाने विनये नये ।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥

**(iii)** विश्व की सभी भाषाओं में संस्कृत प्राचीनतम भाषा है। यह भाषा सभी भाषाओं की जननी है। इस भाषा में प्राचीन ज्ञान-विज्ञान की निधि सुरक्षित है।

यह भाषा अत्यधिक वैज्ञानिक है। संस्कृत भाषा ही कम्प्यूटर के लिए सबसे उत्तम भाषा है। इसका साहित्य वेदों, पुराणों, नीतिशास्त्र, चिकित्साशास्त्र के द्वारा समृद्ध है। संस्कृत भाषा के कालिदास जैसे विश्वप्रसिद्ध कवि का काव्य-सौन्दर्य अनुपम है।

संस्कृत भाषा में अनेक शास्त्रों की रचना की गई है। कौटिल्य का अर्थशास्त्र संसार में प्रसिद्ध है। गणित में शून्य का प्रतिपादन सर्वप्रथम आर्यभट्ट ने किया। चिकित्साशास्त्र में महर्षि चरक एवं सुश्रुत का योगदान विश्व में प्रसिद्ध है। संस्कृत में अन्य शास्त्र जैसे— वास्तुशास्त्र, खगोल विज्ञान, ज्योतिषशास्त्र एवं विमानशास्त्र आदि उल्लेखनीय हैं।

संस्कृत में विद्यमान सूक्तियाँ जीवन में उन्नति के लिए प्रेरित करती हैं। जैसे— सत्यमेव जयते, वसुधैव कुटुम्बकम्, विद्ययाऽमृतमश्नुते, योगः कर्मसु कौशलम् आदि। सभी प्राणियों से आत्मवत व्यवहार करना संस्कृत भाषा ही सिखाती है।

कुछ (लोग) कहते हैं कि संस्कृत भाषा में केवल धार्मिक साहित्य (ही) है– यह धारणा ठीक नहीं है।
संस्कृत ग्रन्थों में मानव जीवन के लिए अनेक विषय समाविष्ट हैं। महापुरुषों के विचार, उत्तम लोगों का धैर्य और जनसामान्य के जीवन के मार्ग वर्णित हैं। जो मनुष्य को जीवनोपयोगी व समाजोपयोगी व्यवहार करना सिखाते हैं। अतः हमें संस्कृत अवश्य पढ़नी चाहिए। संस्कृत अमृतमयी सरस और सरल है।

## पाठ-13 लालनगीतम्

### अभ्यास प्रश्नोत्तराणि

1. छात्र स्वयं गाएँ।
2. (क) धरणी। (ख) पुष्पम्। (ग) विपिने। (घ) नवघासम्। (ङ) उष्ट्रः।
3. **(क)** सलिले का सेलति?
   **(ख)** केषु चित्रपतङ्गाः डयन्ते।
   **(ग)** कः पृष्ठे भारं वहित?
   **(घ)** कदा अश्वः किमपि न खादति ?
   **(ङ)** कस्मिन् उदिते धरणी विहसति?
4.

| | | | |
|---|---|---|---|
| धरणी | पृथिवी | मन्दिरे | देवालये |
| करालम् | भयङ्करम् | सलिले | जले |
| विपिने | वने | हरिणः | मृगः |

5.

| | | | |
|---|---|---|---|
| मन्दम् | क्षिप्रम् | नीचैः | उच्चैः |
| कठोरः | स्निग्धम् | पुरातनम् | नूतनम् |
| अपर्याप्तम् | पर्याप्तम् | | |

6. (क) न (ख) न (ग) न (घ) आम् (ङ) आम् (च) न।
7. भल्लुकः (तृतीया एकवचने) = भल्लुकेन
   उष्ट्रः (पञ्चमी द्विवचने)= उष्ट्राभ्याम्
   हरिणः (सप्तमी बहुवचने) = हरिणेषु
   व्याघ्रः (द्वितीया एकवचने) = व्याघ्रम्
   घोटकराजः (सम्बोधन एकवचने) = हे घोटकराज!
8. 1. प्रातः सूर्यः उदेति । 2. सूर्योदये कमलानि विकसन्ति। 3. वाटिकायां बालाः क्रीडन्ति। 4. वृक्षेषु खगाः कूजन्ति । 5. पुष्पेषु चित्रपतङ्गाः डयन्ते।

### अन्य महत्वपूर्ण-प्रश्नाः

➔ **वस्तुनिष्ठ प्रश्नोत्तराणि**

(i) (अ) (ii) (ब) (iii) (स) (iv) (अ) (v) (ब)।

➔ **अतिलघूत्तरात्मक प्रश्नाः**

**(i)** धरणी सूर्ये उदिते विहसति।
**(ii)** हरिणः नवघासं खादति।
**(iii)** घोटकराजः धावनसमये किमपि न खादति।
**(iv)** तृतीया बहुवचनम्।
**(v)** नृत्यति।

➔ **लघूत्तरात्मक प्रश्नाः**

**(i)** सविलासं हरिणः पश्यति।
**(ii)** पुष्पेषु चित्रपतङ्गाः तिष्ठन्ति।
**(iii)** चित्रपतङ्गाः नानारङ्गाः सन्ति।
**(iv)** पुल्लिङ्ग ।
**(v)** एकवचनम्।

➔ **निबंधात्मक प्रश्नः**

**(i)** सूर्ये उदिते पृथ्वी विहसति खगः कूजति, कमलं विकसति। मन्दिरे ढक्का उच्चै नदति। सरितः जले नौकायाः संचालनं भवति ।

**(ii)** प्रातःकाले धेनुः दुग्धं यच्छति, तद् दुग्धम् शुद्धं, स्वच्छं मधुरं स्निग्धम् च भवति। सघने वने व्याघ्रः गर्जति, तत्र सिंहः उच्चैः नर्दति। हरिणः नवघासं खादति, सर्वत्र च सविलासं पश्यति। उद्गत उष्ट्रः पृष्ठे प्रचुरं भारं आदाय मन्दं-मन्दं गच्छति।
तुरङ्गः तीव्रं धावति, धावनसमये किमपि न खादति। इमं भयानकं भल्लुकं पश्यत थथथै नृत्यति। करतालं कुरु ।

## पाठ–1 वर्ण विचारः

**1.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ)।

**2.** 1. छात्रः 2. भोजनम् 3. अनलाः 4 मुखम् 5. मयूरौ 6. पुष्प 7. कुक्कुरः 8. बिनानी 9. मृगः 10. कलिका ।

**3.** 1. प 2. नु 3. हे 4. धू 5. झो 6. डि 7. बे 8. जो 9. नै 10. था 11. सृ 12. दी 13. कौ 14. चा 15. खै 16. गृ 17. घी 18. छु 19. ष 20. भि ।

**4.** 1. ए 2. इ 3. अ 4. आ 5. ई 6. उ 7. ऐ 8. ऊ 9. ओ 10. औ 11. ऋ 12. ॠ 13. ऊ 14. ओ 15. औ 16. ऋ 17. उ 18. औ 19. ए 20. इ ।

**5.** 1. द्य 2. द्व 3. ध्य 4. ज्ञ 5. त्र 6. क्ष 7. द्ध 8. स्र 9. म्र 10. ड्र 11. ट्र 12. ग्र 13. द्र 14. श्र 15. प्र 16. कृ 17. भ्र 18. ख्र 19. घृ 20. ज्य ।

**6.** 1. च् + अ + ण् + अ् + क् + अः, 2. स् + ऊ + च् + इ + क् + आ, 3. ह् + अ + र् + इ + ण् + इ, 4. ज् + अ + न् + अ + न् + ई, 5. व् + इ + ड् + आ + ल् + अः, 6. ग् + अ + ज् + अः, 7. ह् + अ + स् + त् + अः 8. द् + ए + व् + ई, 9. म् + आ + ल् + आ, 10. अ + ज् + अ + य् + अः ।

●●

## पाठ–2 सन्धि प्रकरणम्

**1.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ)।

**2.** 1. हिम + आलयः, 2. स्वर, 3. रामः + चिनोति, 4. पुरः + हित, 5. व्यंजन संधेः।

**3.** 1. (i) स्वच्छम् (ii) अतीव (iii) वर्षर्तुः
2. (i) पवनः (ii) नाविकस्य (iii) देव्यस्ति
3. (i) ममोपहासम् (ii) प्रतीक्षाम् (iii) मात्रर्थम्
4. (i) ह्येकः (ii) मृगेन्द्रता (iii) वृद्धोपसेविनः
5. (i) दैत्यारिः (ii) सूक्तिम् (iii) सर्वोत्तमः

**4.** 1. (i) गृह + आदीनाम् – दीर्घ सन्धिः
(ii) कदा + अपि – दीर्घ सन्धिः
2. (i) तव + आगमने– दीर्घ सन्धिः
(ii) स + आनन्दम् – दीर्घ सन्धिः
3. (i) न + इच्छति – गुण सन्धिः
(ii) पान + उपयुक्तम् – गुण सन्धिः
4. (i) पुस्तक + आलयः – दीर्घ सन्धिः
(ii) गणेश+उत्सवम्–गुण सन्धिः
5. (i) शिवाजी + उत्सवम् – यण् सन्धिः
(ii) हत + उत्साहानाम् – गुण सन्धिः
6. (i) प्राप्ति + अर्थम्– यण् सन्धिः
(ii) अधुना + अपि – दीर्घ सन्धिः
7. (i) तदा + एव – वृद्धि सन्धिः
(ii) एकम् + अपि– अनुस्वार सन्धिः
8. (i) सुख + अर्थी – दीर्घ सन्धिः
(ii) यथा + इष्टम्– गुण सन्धिः
9. (i) तस्य + उपरि – गुण सन्धिः
(ii) वृहत्तमा + अस्ति – दीर्घ सन्धिः
10. (i) विनश्यति + आशु – यण् सन्धिः
(ii) भार + उत्तोलनम् – गुण सन्धिः

●●

## पाठ–3 पद बोधनम्

**1.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ)।

**2.** (i) संज्ञा (ii) उपसर्ग (iii) अविकारी (iv) सर्वनाम (v) धातु (vi) क्रियापद

**3.** रामाः, गृहाणि, धेनवः।

**4.** स्था, भू, पा, दृश्, गम्।

**5.** सरलः, सुन्दरी, पवित्रम्, शुष्कः।

**6.** रामः, लता, फलम्, भवेयुः।

**7.** कुर्वन्ति, पिबन्ति।

**8.** प्र, आङ् (आ), उप, वि।

**9.** शिवः, सीता, फलम्।

**10.** करोति, श्रृणोति।

**11.** गच्छति।

**12.** अगच्छत्, अहसत्।

●●

## पाठ–4 संज्ञा शब्द–रूप प्रकरणम्

**1.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ), 6. (ब)।

**2.** (i) धीवराः, (ii)हंसौ, (iii) आकाश मार्गेण, (iv) जनाः, (v) पिता, (vi) कोलाहलेन, (vii) स्त्रीशिक्षायाः, (viii) मातुः, (ix) रमायाः, (x) भ्राता, (xi) ब्रह्मसमाजेन, (xii) शिक्षायै, (xiii) सम्मानाय, (xiv) भाषासु, (xv) शिवं, (xvi) मात्रे, (xvii) विजयया, (xviii) प्रभावात्, (xix) कारणात्, (xx) नेत्राणि।

**3.** 1. (i) रामाय (ii) हरीणाम्

2. (i) कविषु (ii) मत्या

3. (i) नद्याम् (ii) बालकौ

4. (i) गुरोः (ii) साधुभ्याम्

5. (i) पती (ii) भूपतिना

6. (i) मुनये (ii) श्रीपतेः

7. (i) भानुः (ii) सखायौ

8. (i) सुधियम् (ii) पितुः

9. (i) कर्तृभिः (ii) मातुः

10. (i) शत्रुभ्यः (ii) गवि

●●

## पाठ–5 सर्वनाम शब्द रूप प्रकरणम्

**1.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ), 6. (ब)।

**2.** (i) ते, (ii) एतत्, (iii) अहं, (iv) आवां, (v) तव, (vi) सः, (vii) वयं, (viii) इदं, (ix) तस्मिन्, (x) तस्याः।

**3.** (i) कः, (ii) अहं, (iii) यूयं, (iv) तस्य, (v) तेन, (vi) एतत्, (vii) अहं, (viii) मम, (ix) त्वं, (x) ते।

**4.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ)।

**5.** (i) पृथिव्यां <u>कति</u> रत्नानि सन्ति?
(ii) <u>का</u> बहुरत्ना अस्ति?
(iii) एकदा तत्र <u>के</u> आगच्छन्?
(iv) <u>कस्य</u> पिता समृद्धः आसीत्?
(v) तस्मिन् विशाले भवने <u>कति</u> स्तम्भाः आसन्?
(vi) <u>का</u> शिवं पतिरूपेण अवाञ्छत्?
(vii) <u>कः</u> कदापि धैर्यं न परित्यजति?
(viii) स्वधर्मात् वयं <u>किं</u> न कुर्याम?
(ix) <u>कान्</u> गणयाम?
(x) <u>का</u> राजसु पूज्यते?

**6.** 1. (i) मम, मे (ii) युष्मान्, वः 2. (i) तुभ्यम्, ते (ii) भवत्योः 3. (i) भवतः (ii) किम् 4. (i) केषाम् (ii) काः 5. (i) मयि (ii) यस्मै

6. (i) यासु (ii) यानि 7. (i) सर्वयो: (ii) सर्वेषाम् 8. (i) सर्वाभ्याम् (ii) इमौ 9. (i) इमाम् (ii) इदम् 10. (i) एतेभ्य: (ii) एता।

## पाठ–6 विशेषण प्रकरणम् संख्यावाचक तथा क्रमवाचक

**1.** (i) (क) एकां, (ii) (ग) द्वितीयं, (iii) (क) त्रय:, (iv) (ख) सप्त, (v) (क) चतुर्थ:।

**2.** 1. एक: 2. पञ्चाशीति: 3. त्रीणि 4. द्वे 5. शतम् 6. एक: 7. पञ्च 8. पञ्चचत्वारिंशत् 9. दश 10. सप्त ।

**3.**

| | |
|---|---|
| 1. एकादश | 2. द्वाविंशति |
| 3. अष्टादश | 4. षोडश |
| 5. एकाशीति | 6. सप्तति |
| 7. षट्षष्टि | 8. सप्ताशीति |
| 9. नवाशीति | 10. षट्चत्वारिंशत् |
| 11. पञ्चदश | 12. पञ्चपञ्चाशत् |
| 13. सप्तसष्टि | 14. नवदश, एकोनविंशति |
| 15. पञ्चविंशति | 16. अष्टनवति |
| 17. सप्तत्रिंशत् | 18. नवत्रिंशत् |
| 19. पञ्चाशत् | 20. एकनवति |
| 21. पञ्चाशीति | 22. नवति |
| 23. नवनवति | 24. नवविंशति |
| 25. द्विसप्तति | 26. षष्टि |
| 27. एकषष्टि | |
| 28. नवषष्टि, एकोनसप्तति | |
| 29. अष्टत्रिंशत् | 30. अष्टचत्वारिंशत् । |

**4.**

| | |
|---|---|
| 1. द्वात्रिंशत्तम | 2. षट्चत्वारिंशत्तम |
| 3. एकविंशतितम | 4. एकत्रिंशतम |
| 5. एकचत्वारिंशत्तम | |
| 6. एकादश | 7. द्वा चत्वारिंशत्तम |
| 8. अष्टम | 9. पञ्चम |
| 10. पंचदश | |
| 11. पञ्च चत्वारिंशत्तसम | |
| 18. नवम | 13. एकोनविंशतितम |
| 14. नवविंशतितम | 15. नवत्रिंशत्तम |
| 16. नवचत्वारिंशत्तम | 17. अष्टचत्वारिंशत्तम |
| 18. सप्तविंशतितम | 19. पञ्चविंशतितम |
| 20. सप्तदश । | |

**5.**

| | |
|---|---|
| 1. एका | 2. द्वे |
| 3. एका | 4. तिस्र: |
| 5. एकया | 6. चतस्र: |
| 7. एकस्या: | 8. तिस्र: |
| 9. चतसृभ्य: | 10. तिसृणाम् |

## पाठ–7 धातु–रूप प्रकरणम्

**1.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ), 6. (ब), 7. (स), 8. (द), 9. (अ), 10. (ब)।

**2.** 1. अतिष्ठत्, 2. अगच्छताम्, 3. अपश्यम्, 4. अपिबन्, 5. अक्रीडन्, 6. अरक्षन्, 7. अस्मरम्, 8. अजयाव, 9. अवदाम, 10. अनम:।

**3.** 1. पिवति, 2. वदथ:, 3. खादाम:, 4. पठन्ति, 5. रक्षन्ति, 6. पूजयति, 7. गच्छति, 8. पश्यति, 9. चिनोति, 10. सन्ति।

**4.** 1. गमिष्यति, 2. द्रक्ष्यत:, 3. रक्षास्यन्ति, 4. पास्यसि, 5. क्रीडिष्यथ:, 6. रक्षिष्यथ, 7. स्मरिष्यामि, 8.जेष्याव:, 9. वदिष्याम:, 10. नमामि।

## पाठ-8 कारकम्

1. 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ), 6. (ब), 7. (स), 8. (द), 9. (अ), 10. (ब)।
2. (i) भाषासु, (ii) ब्रह्मसमाजेन, (iii) रमायाः, (iv) सम्मानाय, (v) समाजस्य, (vi) मातुः, (vii) कोलाहलेन।
3. (i) मनसि, (ii) प्रश्नैः, (iii) गृहात्, (iv) वृक्षे, (v) वृक्षस्य, (vi) नीडं, (vii) गजेन।
4. (i) इदम्, (ii) वृक्षात्, (iii) धनाय, (iv) हस्तेन, (v) कलमेन।
5. 1. (i) पठनात् (ii) वीणावादने (iii) विडालात् (iv) रामात् ।, 2. (i) कंसाय (ii) परिहासेन (iii) छात्रेभ्यः (iv) आम्रेण 3. (i) वयने (ii) बालकाय (iii) अग्नये (iv) धावने 4. (i) लक्ष्म्यै (ii) वार्तालापेन (iii) सिंहात् (iv) पुत्रे 5. (i) बालकेभ्यः (ii) मार्गम् (iii) केन (iv) बाले 6. (i) पञ्जरात् (ii) नगरम् (iii) दुर्गम् (iv) मात्रा 7. (i) इन्द्राय (ii) ज्ञानात् (iii) चौरम् (iv) गृहात्।

●●

## पाठ-9 उपसर्ग प्रकरणम्

**(I)** (1) अ, (2) द, (3) स, (4) अ, (5) अ, (6) द, (7) ब, (8) अ, (9) अ, (10) ब।

**(II)** (1) ब (2) अ (3) स (4) स (5) स (6) ब (7) अ (8) स (9) स (10) स।

**(III)** (1) अ (2) ब (3) स (4) स (5) द।

**(IV)** **1.** अवगच्छन्ति, **2.** प्रहारः, **3.** उपगच्छति, **4.** समागच्छत्, **5.** उन्नतिः।

●●

## पाठ-10 विशेषण प्रकरणम्

1. 1. (स), 2. (अ), 3. (अ), 4. (अ), 5. (स)।
2. 

| (क) | (ख) |
|---|---|
| 1. समानाः | (iii) अवसराः |
| 2. दानवीरः | (iv) भामाशाहः |
| 3. एकः | (v) काकः |
| 4. करुणं | (ii) क्रन्दनं |
| 5. इयं | (i) कथा |

3. **1.** श्वेत, **2.** द्वितीये, **3.** रक्त, **4.** प्रचुरं, **5.** एकः ।

●●

## पाठ-11 समास प्रकरणम्

1. (1) ब (2) अ (3) अ (4) द (5) स ।
2. (1) पीताम्बरः (2) चतुर्युगी (3) कृष्णः (4) महान् (5) विग्रहम् ।
3. 

| क | ख |
|---|---|
| 1. सुन्दर बालकः | (iii) कर्मधारयः |
| 2. अष्टाध्यायी | (v) द्विगुः |
| 3. आबालम् | (iv) अव्ययीभावः |
| 4. चन्द्रमुखी | (ii) बहुव्रीहिः |
| 5. हरिहरौ | (i) द्वन्द्व समासः |

4. (1) 3 (2) 5 (3) 5 (4) 3 (5) 5 ।
5. (1) (i) घन इव श्यामः कर्मधारय (ii) चक्रं पाणौ यस्य सः विष्णुः बहुव्रीहि । (2) (i) कृष्ण समीपम्— तत्पुरुष/उपकृष्णम्–अव्ययी भाव (ii) सप्तर्षि–द्विगु। (3) (i) गुरुः चासौ

देव: कर्मधारय (ii) त्रयाणां भुवनानां समाहार: – द्विगु । (4) (i) कुपुरुष- कर्मधारय (ii) द्विरात्रम्-द्विगु। (5) (i) यथा शक्ति-अव्यवीभाव (ii) सुखदु:खम्- द्वन्द्व। (6) (i) पीतम् अम्बरं यस्य स: - बहुव्रीहि (ii) धर्मेण हीन: तत्पुरुष। (7) (i) देवपुत्र- तत्पुरुष (ii) पुत्रपौत्रा: – द्वन्द्व।

●●

## पाठ–12 वाच्यपरिवर्तनम्

**1.** 1. (i) छात्रेण **पुरस्कार:** गृह्यते ।
(ii) छायाकारेण **छायाचित्रं** रच्यते ।
(iii) मया **लेख:** लिख्यते ।
2. (i) वृक्षै: फलानि **दीयन्ते** ।
(ii) छात्रै: **गुरव:** नम्यन्ते ।
(iii) **पापिना** पापं क्रियते ।
3. (i) विद्यया विनय: **दीयते** ।
(ii) मया **पिता** सेव्यते ।
(iii) **त्वया** अहं पृच्छ्ये ।
4. (i) **नृपेण** शत्रु: हन्यते ।
(ii) सर्पै: **पवन:** पीयते ।
(iii) वृद्धेन वेदा: **पठ्यन्ते** ।
5. (i) त्वया कथा **श्रूय**ते ।
(ii) **मया** मोह: त्यज्यते ।
(iii) राम: **जनकं** प्रणमति ।

**2.**

1. महेश: – दिनेश ! प्रात:काले **भवान्** किं करोति?
दिनेश: – मया **पाठ:** स्मर्यते।
महेश: – किं भवान् प्रात: भ्रमणाय गच्छति।
दिनेश: – अहम् अस्वस्थ:, अत: **मया** भ्रमणाय न गम्यते।
महेश: – किं भवान् नित्यं **व्यायामं** करोति?
दिनेश: – आम् ! मया नित्यं व्यायाम: **क्रियते**।

2. सीता – बालिका कां खादति?
गीता – तया रोटिका **खाद्यते**।
सीता – त्वं कि पठसि?
गीता – **मया** गीता पठ्यते।
सीता – मया फलानि **खाद्यन्ते**।

3. देवदत्त: – ब्रह्मदत्त ! किं त्वं पत्रालयं गच्छसि?
ब्रह्मदत्त: – न, मया तु इदानीं पत्र लिख्यते।
देवदत्त: – अधुना त्वं निबन्धम् अपि **लिखसि** किम्।
ब्रह्मदत्त: – मया तु अधुना गणितस्य अभ्यास: **क्रियते**।
देवदत्त: – अहं तु पत्रालयमेव **गच्छामि**।
ब्रह्मदत्त: – गच्छ त्वम्। मया तु अत्रैव **स्थीयते**।

4. रमाशंकर: – रमे ! अधुना कस्यां कक्षायां पठसि?
रमा – रमे ! अधुना कस्यां कक्षायां पठसि?
रमाशंकर: – किं **त्वम्** रञ्जिनीयां पदानुशीलनीम् अपि पश्यसि?
रमा – आम् ! **मया** पदानुशीलनी अपि दृश्यते।
रमाशंकर: – किं त्वम् अभ्यासपुस्तिकायाम् उत्तराणि लिखसि?
रमा – आम् ! मया अभ्यासपुस्तिकायाम् एव उत्तराणि **लिख्यन्ते**।

5. राका – केन तम: हन्यते?
राकेश: – चन्द्र: तम: **हन्ति**।
राका – मालाकार: कान् सिञ्चति।
राकेश: – मालाकारेण वृक्षा: **सिच्यन्ते**।
राका – किं **त्वम्** पितरौ पूजयसि ?
राकेश: – आम् **मया** पितरौ पूज्येते।

●●

## पाठ–13 प्रत्यय–प्रकरणम्

**1.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ), 6. (ब), 7. (स), 8. (द), 9. (अ), 10. (ब)।

**2.** **1.** पीत्वा, **2.** पठन्, **3.** लिखितम्, **4.** रचितवान्, **5.** वक्तव्यम्।

**3.**

1. (i) इष् + क्त = चाहा गया
(ii) अधि + क्त = पढ़ा गया।
(iii) कथ् + क्त = कहा गया
(iv) कुप् + क्त = नाराज हुआ

2. (i) खाद् + क्त = खाया गया
(ii) गम् + क्त = गया
(iii) चल् + क्त = चला गया
(iv) ज्ञा + क्त = जाना गया

3. (i) दृश् + क्त = देखा गया
(ii) नश् + क्त = नष्ट किया गया
(iii) नी + क्त = ले जाया गया
(iv) पत् + क्त = गिरा गया

4. (i) हन् + क्त = मारा गया
(ii) वच् + क्त = कहा गया
(iii) लिख् + क्त = लिखा गया
(iv) जि + क्त = जीता गया

5. (i) पठ् + क्तवतु = पढ़ा
(ii) गम् + क्तवतु = गया
(iii) हन् + क्तवतु = मारा
(iv) दृश् + क्तवतु = देखा

6. (i) कृ + क्तवतु = किया
(ii) नी + क्तवतु = ले गया
(iii) आ + नी + क्तवतु = लाया ।
(iv) आ + दिश् + क्तवतु = आदेश दिया

7. (i) हृ + क्तवतु = चुराया
(ii) कथ् + क्तवतु = कहा
(iii) भाष् + क्तवतु = कहा
(iv) उप + कृ + क्तवतु = उपकार किया

8. (i) श्रु + क्तवतु = सुना
(ii) वच् + क्तवतु = कहा
(iii) दा + क्तवतु = दिया
(iv) प्रच्छ् + क्तवतु = पूछा

9. (i) अभू + क्त्वा = होकर
(ii) गम् + क्त्वा = जाकर
(iii) ग्रह + क्त्वा = लेकर
(iv) कृ + क्त्वा = करके

10. (i) ज्ञा + क्त्वा = जानकर
(ii) दृश् + क्त्वा = देखकर
(iii) धाव् + क्त्वा = दौड़कर
(iv) धृ + क्त्वा = धारण कर

**4.** **1.** (i) कृत: (ii) कृष्ट:
**2.** (i) खादित: (ii) त्यक्त:
**3.** (i) अत्वा (ii) भूत्वा
**4.** (i) नत्वा (ii) भ्रमित्वा
**5.** (i) आदृत्य (ii) आगम्य
**6.** (i) प्रविश्य (ii) अधीत्य
**7.** (i) दानीय: (ii) सर्जनीय:
**8.** (i) चोरणीय: (ii) चयनीय:
**9.** (i) अध्येयम् (ii) पेयम्
**10.** (i) गेयम् (ii) ज्ञेयम्
**11.** (i) मुदित: (ii) चिन्तयित्वा
**12.** (i) उक्त्वा (ii) श्रवणीय:।

●●

## पाठ–14 अव्यय–निरूपणम्

**1.** 1. (अ) 2. (ब) 3. (स) 4. (द) 5. (अ) 6. (ब) 7. (स) 8. (द) 9. (अ) 10. (ब)।

**2.** (i) ऋते (ii) एव (iii) नीचै: (iv) तदा (v) हय: (vi) अपि (vii) न (viii) शीघ्रम् (ix) सह (x) कदा।

**3.** (i) उपरि (ii) अलम् (iii) बहि: (iv) अध: (v) अन्त: (vi) सदा (vii) न (viii) तथा (ix) च (x) अपि।

**4.** (i) भृत्या: सदैव **सर्वत्र** उपस्थिता: भवितुं न शक्नुवन्ति। (ii) मम गृहे **तु** बहव: कर्मकरा: सन्ति। (iii) **अत्र** क: उपाय: ? (iv) **अधुना** किम् अहं करोमि ? (v) प्रात: **यद्** उचितं **तद्** कर्त्तव्यम् । (vi) **एकदा** सरोवरे धीवरा: आगच्छन्। (vii) **तत्र** संकटविकटौ हंसौ निवसत:। (viii) जना: **किञ्चिद्** वदिष्यन्ति। (ix) त्वम् **अत्रैव** वस । (x) **यदा यदा** ते अनुपस्थिता: तदा तदा त्वं कष्टम् अनुभवसि।

●●

## पाठ-15 अशुद्धि-संशोधनम्

**1.** 1. (अ), 2. (ब), 3. (स), 4. (द), 5. (अ), 6. (ब), 7. (स), 8. (द), 9. (अ), 10. (ब)।

**2.** 1. गच्छत:, 2. त्रय:, 3. सत् शास्त्रं, 4. पितु:।

**3.**

(1) (क) रामात् श्याम: चतुरतर: ।
(ख) सा स्त्री कलावती विद्यते ।
(ग) सूर्ये अस्तंगते स आगत: ।
(घ) अस्माकं राष्ट्रं बलवत् विद्यते ।
(ङ) अस्यां कक्षायां अनेके छात्रा: सन्ति।

(2) (क) तं विना अहं किं करोमि ?
(ख) तत: राज्ञा उक्तम् ।
(ग) रामात् श्याम: लघुतर: विद्यते ।
(घ) तत्र अनेके नेतार: सन्ति ।
(ङ) छात्रेषु गोपाल: बुद्धिमत्तम: ।

(3) (क) वृक्षेभ्य: पत्राणि पतन्ति ।
(ख) उपाध्यायाद् व्याकरणं पठति ।
(ग) भोजनाद् अनन्तरं शतपदं गच्छेत् ।
(घ) तिलेभ्यो माषान् प्रतियच्छति ।
(ङ) क्रोशं कुटिला नदी ।
(च) ग्रामं परितो वनम् अस्ति ।
(छ) बालक: आसन्दिकाम् अधितिष्ठति ।
(ज) ग्रामम् अजां नयति।
(झ) मरणात् कस्य भयं नास्ति।
(ण) ग्रामस्य दक्षिणत: विद्यालयोऽस्ति ।

(4) (क) कामात् क्रोधोऽभिजायते।
(ख) राम: धर्मात् न प्रमाद्यति ।
(ग) त्वं कस्यां कक्षायां पठसि ?
(घ) गृहाद् आराद् विद्यालयोऽस्ति ।
(ङ) शैशवात्प्रभृति पालिताम् ।
(च) नगराद् बहि: वनानि सन्ति ।
(छ) राम: सीता च वनं गच्छत: ।
(ज) रमेश: कदा आगच्छति ?
(झ) ज्ञानाद् ऋते सुखं नास्ति।
(ण) कविषु कालिदास: श्रेष्ठ: ।

(5) (क) सज्जन: सुखेन जीवति ।
(ख) भिक्षुकाय वस्त्राणि यच्छति ।
(ग) शिक्षकात् गणितं पठति।
(घ) वृक्षस्य उपरि काक: तिष्ठति ।
(ङ) पठने इच्छा अस्ति ।
(च) इदं कार्यं करणीयम् अस्ति ।

(6) (क) विद्यालये छात्रा: पठनार्थं गच्छन्ति ।
(ख) कालिदासस्य त्रीणि महाकाव्यानि सन्ति ।
(ग) सच्छात्रम् अधीत्य विद्वान् लभते ज्ञानम्।
(घ) राम: पित्रा सार्धं ग्रामान्तरं गच्छति ।
(ङ) नर: ज्ञानेन विना पशु: मन्यते ।
(च) हिमालयस्य दक्षिणत: भारतम्।
(छ) ते चलचित्रं द्रक्ष्यन्ति।
(ज) श्रीगणेशाय नम: ।

●●

## पाठ–16 अनुवाद–प्रकरणम्

**1.** (1) मोहनः धावति । (2) बालकः पठति। (3) राधा भोजनं पचति । (4) छात्रः पश्यति। (5) शृगालः आगच्छति । (6) सः प्रश्नं पृच्छति । (7) कपिः फलं भक्षयति। (8) शिशू पठतः । (9) ते धावन्ति । (10) बालकाः चित्रं पश्यन्ति । (11) जननी कथां कथयति। (12) मोहन सोहन च पत्रं लिखतः । (13) छात्रौ किं पश्यतः? (14) बालकौ पाठं पठतः । (15) सिंहः वने धावति । (16) गजः ग्रामं गच्छति । (17) सीता वनं गच्छति । (18) रामः श्यामः च हसतः । (19) बालकः पाठं स्मरति । (20) कृषकः अजां नयति।

**2.** (1) त्वं पाठं पठसि । (2) त्वं किं पश्यसि? (3) त्वं कदा गच्छसि ? (4) युवां चित्रं पश्यथः । (5) युवां पत्रं लिखथः। (6) यूयं अत्र आगच्छथ । (7) यूयं प्रातः धावथ । (8) युवां फलं भक्षयथः । (9) त्वम् अत्र आगच्छसि । (10) यूयं कुत्र गच्छथ ? (11) युवां पाठं स्मरथः । (12) त्वं किं पिबसि ?

**3.** (1) अहं दुग्धं पिबामि । (2) आवां कुत्र गच्छावः ? (3) वयं कथां कथयामः । (4) अहं मयूरं पश्यामि । (5) आवां जलं पिबावः । (6) वयं क्रीडाक्षेत्रं गच्छामः । (7) अहं किं भक्षयामि ? (8) आवां किं पचावः ? (9) वयं प्रश्नं पृच्छामः । (10) आवां किं लिखावः? (11) आवां किमर्थं हसावः ? (12) अहं कदा पुस्तकानि आनयामि ?

**4.** (1) सः ग्रामम् अगच्छत् । (2) विप्रः गृहम् अगच्छत्। (3) सः स्नानम् अकरोत् । (4) रामः मोहनः च अपठताम्। (5) तौ उद्यानम् अगच्छताम् । (6) सीता जलम् आनयत् । (7) बालिका भोजनम् अभक्षयत्। (8) किं तव सहोदरः अत्र आगच्छत्? (9) यूयं कुत्र अगच्छत? (10) सीता एकं पत्रम् अलिखत्। (11) नृपः अरक्षत् । (12) सः प्रसन्नः अभवत् ।

**5.** (1) ब्रह्मदत्तः गमिष्यति । (2) मोहनश्यामः पत्रं लेखिष्यति। (3) बालकाः पाठं पठिष्यन्ति । (4) त्वं पाठं स्मरिष्यसि । (5) सीता वनं गमिष्यति । (6) ते चित्रं द्रक्ष्यन्ति । (7) प्रमिला भोजनं पक्ष्यति । (8) युवां दुग्धं पास्यथः । (9) छात्राः क्रीडाक्षेत्रे धाविष्यन्ति। (10) अहं किं करिष्यामि ? (11) आवां तत्र पठिष्यावः। (12) यूयं किं भक्षयिष्यथ ?

**6.** (1) राधा पाठं पठतु । (2) छात्रः भोजनं करोतु । (3) नृपः धनं यच्छतु । (4) ईश्वरः जीवनं रक्षतु । (5) वयं चित्रं पश्याम । (6) त्वम् उद्याने धाव । (7) ते पुष्पाणि नयन्तु । (8) तौ जलं पिबताम् । (9) राधा भोजनं पचतु । (10) युवां पाठं पठतम् । (11) ते प्रश्नं पृच्छन्तु । (12) वयं सर्वे प्रसन्नः भवाम ।

**7.** (1) अध्ययनं कुरु। (2) धूम्रपानं मा कुरु। (3) जलपानं कुरु । (4) प्रातः भ्रमणं कुरु। (5) स्वच्छं जलं पिब । (6) देशस्य रक्षां कुरु । (7) स्वामिभक्तः भव। (8) कर्तव्यस्य पालनं कुरु । (9) सदा सत्यं वद। (10) गुरुजनानाम् आज्ञापालनं कुरु। (11) मित्रैः सह कलहं मा कुरु । (12) मदिरापानं मा कुरु । (13) द्यूतं मा क्रीड । (14) सज्जनानां संगतिं कुरु।

**8.** (1) सः पाठं पठेत् । (2) त्वं तत्र गच्छेः । (3) सीता भोजनं पचेत् । (4) सः पत्रं लिखेत् । (5) त्वं क्रोध न कुर्याः । (6) त्वं पाठं स्मरेः । (7) अहं त्वया सह भवेयाम्। (8) जननी कथां कथयेत् । (9) वयं प्रतिदिनं विद्यालयं गच्छेम । (10) ते ग्रामं न गच्छेयुः । (11) त्वं स्वच्छं जलं पिबेः । (12) यूयं चित्राणि पश्येत ।

●●

## पाठ–17 पर्यायवाची एवं विलोम शब्द

1. (i) (ग), (ii) (क), (iii) (ग)।
2. 1. मही, 2. अचल:, 3. अम्बरम्, 4. अम्बु।
3. (i) भूमि:, अवनि:, मही, वसुन्धरा। (ii) मराल:, चक्रांग, कलहंस:, नीरक्षीर-विवेचक:। (iii) तात:, जनक:, प्रसवितृ, जनयितृ। (iv) नौकर:, दास:, किंकर:, अनुचर:। (v) गेहं, वेश्मन्, सदनं, निकेतनम्। (vi) अकाल:, दुष्काल:, अनशनं, नीवाक: । (vii) पुष्पं, प्रसूनं, सूनं, मणीवकंम्। (viii) शार्दूल:, पंचशिख:, सिंह:, द्वीपिन् । (ix) उमा, अंबिका, गौरी, नंदा। (x) वनिता, महिला, रामा, नारी ।
4. (i) वनम् (ii) देवता: (iii) दुष्ट: (iv) पक्षी (v) वृक्ष: (vi) पुत्री (vii) तडाग: (viii) माता (ix) शत्रु: (x) भगवान् ।
5. (i) अग्रज: (ii) सज्जन: (iii) मलिनम् (iv) अचेतन: (v) चपल: (vi) कुटिल: (vii) मन्द: (viii) शोक (ix) द्वेष: (x) अवनति:।

●●

## पाठ–18 घटिकाचित्रसाहाय्येन समय-लेखनम्

### (सामान्य–सार्ध–पादोन इत्यादय:)

1. (i) सार्ध षड्
   (ii) पदानोष्ट
   (iii) सपादाष्ट
   (iv) एकादश
2. (i) पञ्चवादनम्
   (ii) सार्धपञ्चवादनम्
   (iii) सपादषड्वादनम्
   (iv) चत्वारिंशत् पलोत्तर षड्वादनम्
3. (i) षड्वादनम्
   (ii) अष्टवादनम्
   (iii) सार्धत्रिवादनम्

●●

**रचना**

## पाठ–1 चित्राधारित वर्णनम्

1. 1. अस्मिन् चित्रे वयं नृत्यशालां पश्याम: । 2. अत्र द्वे बालिके नृत्यत:। 3. शिक्षिका ते नृत्यं शिक्षयति। 4. ते प्रतिदिनं गृहात् आगच्छत: नृत्यस्य अभ्यासं च कुरुत:। 5. अत्र ते नृत्यं कुरुत:।
2. 1. एतस्मिन् चित्रे एक: जलाशय: रमणीय: पर्वत: च स्त: । 2. जलाशये वर्तिका: तरन्ति। 3. जलाशयस्य तटे बहव: वृक्षा: सन्ति । 4. अत्र शीतलवायु: प्रवहति। 5. जलाशयस्य दृश्यं मनोरमम् अस्ति।
3. 1. इदम् मम गृहम् अस्ति। 2. गृहं सर्वत: सुन्दरवृक्षा: सन्ति। 3. वृक्षेषु बहूनि पुष्पाणि भवन्ति। 4. मम गृहे मन्दिरम् अस्ति। 5. वयं प्रात:काले तत्र पूजां कुर्म:।
4. 1. वृक्षा: अस्माकं मित्राणि सन्ति। 2. वृक्षै: पर्यावरणं शुद्धं भवति। 3. वृक्षै: भूमे: रक्षणं भवति। 4. वृक्षारोपणम् अस्माकं कर्त्तव्यम्। 5. प्रतिवर्षं वर्षाकाले जना: वृक्षारोपणं कुर्वन्ति।
5. 1. इदं नद्या: चित्रम् अस्ति। 2. नदीम् उभयत: वृक्षा सन्ति। 3. वृक्षेषु पादपेषु च

खगाः कूजन्ति तिष्ठत्ति च। 4. खगाः मधुरं गायन्ति। 5. नदी-जलं कल-कल स्वरेण प्रवहति।

**6.** 1. इदं चित्रं शिशु-मात्रोः स्नेहस्य अस्ति। 2. अत्र एकः शिशुः अस्ति। 3. माता शिशुं स्नेहेन पश्यति। 4. शिशुः मातुः अङ्के स्वपिति। 5. माता प्रसन्ना भवति।

**7.** 1. अस्मिन् चित्रे ग्रामस्य एक तडागः अस्ति। 2. तडागस्य तटे एकः विशाल वृक्षः तिष्ठति। 3. तथा अनेके बालकाः क्रीडन्ति। 4. तडागस्य जले बालकाः, युवकाः वृद्धाः, च स्नानं कुर्वन्ति। 5. पशवः अपि जलं पिवन्ति, खगाः च कूजन्ति।

●●

## पाठ-2 अनुच्छेद लेखनम्

**1.** (i) भवति (ii) प्रकृतिप्राङ्गणे (iii) सूर्योदयात् (iv) भ्रमणार्थं (v) वृक्षशाखासु (vi) साम्राज्यं (vii) भास्करः (viii) सर्वजीवान् (ix) स्फूर्तिमान् (x) सत्त्वगुणस्य ।

**2.** (i) जन्मभूमिश्च (ii) महत्त्वपूर्णे (iii) मातृभूमौ (iv) नानाविधानि (v) स्मरिष्यति (vi) स्वाभाविकौ (vii) अस्माकं (viii) अतः (ix) परमेश्वराः (x) मधुरतराणि।

**3.** (i) मेलकं (ii) गच्छति (iii) अनेके (iv) मकरः (v) भीतौ (vi) आसीत् (vii) करणीयम् (viii) जनयोः (ix) रक्षणम् (x) बालिकायै।

●●

## पाठ-3 निबन्ध-लेखनम्

**1.** 1. अस्माकं, 2. धर्मपरम्परा, 3. विद्यानां, 4. क्रीडास्थली, 5. पवित्रतमाः, 6. हिमालयः, 7. समानः, 8. विविधरत्नानां, 9. जातयः, 10. अस्य।

**2.** 1. ऋतवः, 2. वसन्तः, 3. कुसुमाकरः, 4. विविधरूपाणि, 5. लतावृक्षादयः, 6. अतिशोभनं, 7. मञ्जर्यः, 8. जलम्, 9. सुगन्धयुक्तः, 10. नवीनम्।

**3.** 1. ग्रामे, 2. विशालः, 3. कमलानि, 4. स्नानं, 5. विद्यालयः, 6. बालिकाः, 7. क्षेत्राणि, 8. धेनूः, 9. परस्परं, 10. नगरात्।

**4.** 1. कृषिप्रधानः, 2. निवासं, 3. परिश्रमेण, 4. पालनं, 5. राष्ट्रस्य, 6. अतिसरलं, 7. सहचराः, 8. पालकत्वेन, 9. धनधान्येन, 10. कृषकाः।

**5.** 1. हिमालयः, 2. नगाधिराजः, 3. पर्वतेषु, 4. शिखराणि, 5. ओषधयः, 6. निवासं, 7. हिमालयात्, 8. क्रीडाभूमिः, 9. शत्रुभ्यः, 10. हितकरः।

●●

## पाठ-4 पत्र-लेखनम्

**1.** सेवायाम्,
श्रीमन्तः प्रधानाध्यापक महोदयाः
महाराजा बदनसिंह उ. प्रा. विद्यालयः,
भरतपुरम् ।
**विषयः–** शिक्षणशुल्कमुक्तये प्रार्थना-पत्रम्।

महोदयः,
सविनयं प्रार्थये यदहं श्रीमन्तः विद्यालये **सप्तम् कक्षायाः** छात्रोऽस्मि। मम **पितुः** आर्थिकस्थितिः शोचनीयाऽस्ति। मम पिता **वृद्धोऽस्ति,** प्रतिदिवसं कार्ये पञ्चाशद् रूप्यकाणाम् **अर्जनमेव** भवति । तेन

**परिवारस्य** पालन-पोषणञ्च कथमपि भवितुं न शक्नोति । अतः अहं **विद्यालयस्य** शिक्षणशुल्कं **प्रदातुम्** असमर्थोऽस्मि । गतवर्षे मम शिक्षणशुल्क-मुक्तिः **आसीत् ।** सप्तम कक्षायाः **परीक्षायाम्** अहं प्रथमश्रेण्याम् उत्तीर्णोऽभवम् ।

अतः पुनः निवेदनमस्ति यत् भवन्तः अध्ययने मम रुचिं विलोक्य मह्यं शिक्षण-शुल्कात् मुक्ति प्रदाय अनुग्रहीष्यन्ति।

दिनांकः 5-7-20........ ई.

भवदाज्ञाकारी शिष्यः
सुरेशचन्द्रः
कक्षा 7 (स)

**2.** सेवायाम्,
श्रीमन्तः प्रधानाचार्यमहोदयाः
राजकीयः उच्च माध्यमिक विद्यालयः
जोधपुरम् ।

**विषयः**–दिनद्वयस्य **अवकाशार्थं** प्रार्थनापत्रम्।

**महोदयः,**

सविनयं निवेदनम् **अस्ति** यत् मम ज्येष्ठभ्रातुः **पाणिग्रहणसंस्कारः** 28-11-20....... दिनाङ्के **निश्चितः ।** एतत् कारणात् दिनद्वयं यावद् अहं स्वकक्षायामुपस्थातुं न **शक्नोमि**। अतः **निवेदनमस्ति** यत् 28-11-20....... दिनाङ्कतः 29-11-20....... दिनाङ्क पर्यन्तं **दिनद्वयस्य** अवकाशं स्वीकृत्य माम अनुग्रहीष्यन्ति **श्रीमन्तः** ।

सधन्यवादम् ।

दिनाङ्कः 28-11-20.........

भवदीयः शिष्यः
भारतः शर्माः
(सप्तम् कक्षा)

**3. सेवायाम्,**
श्रीमन्तः प्रधानाध्यापकमहोदयाः
**राजकीयः** उच्चप्राथमिकविद्यालयः
अजयमेरूः ।

**विषयः**–दिनत्रयस्य **अवकाशार्थं** प्रार्थना-पत्रम्।

महोदयाः,

**सविनयं** निवेदनम् अस्ति यत् **मम माता** गतदिवसात् शीतज्वरेण **पीड़िता** अस्ति । एतस्मात् कारणात् अहं विद्यालयम् आगन्तुं न शक्नोमि।

कृपया 8-10-20......... दिनांकतः 10-10-20......... दिनांक**पर्यन्तं** दिनत्रयस्य अवकाशं **स्वीकृत्य माम्** अनुग्रहीष्यन्ति श्रीमन्तः।

सधन्यवादम् ।

दिनांकः 8-10-20.........

भवदाज्ञाकारी शिष्यः
रमनः
(सप्तम् कक्षा)

**4.** सेवायाम्,
श्रीमन्तः प्रधानाचार्यमहोदयाः
राजकीयः उच्चमाध्यमिकविद्यालयः,
**दौसानगरम् ।**

**विषय-स्थानान्तरण**-प्रमाण प्रत्रं प्राप्तुं प्रार्थना-पत्रम् ।

महोदयाः,

सविनयं निवेदनम् अस्ति यत् मम पिता अत्र **लिपिकः** अस्ति। अधुना तस्य स्थानान्तरणं **भरतपुरम्** अभवत् । मम **परिवारः** मम पित्रा सह भरतपुरं गमिष्यति । अहम् अस्मात् **विद्यालयात्** सप्तकक्षाम्, उत्तीर्णवान् अष्टकक्षायाम् अहं भरतपुरे **पठिष्यामि** । अतः मह्यं स्थानान्तरण-प्रमाण-प्रत्रं **प्रदाय** अनुग्रहीष्यन्ति भवन्तः इति ।

सधन्यवादम् ।

दिनांकः 15-7-20........

**भवदाज्ञाकारी** शिष्यः
रामकुमारः
(सप्तम् कक्षा)

**5.** सेवायाम्,
श्रीमन्तः प्रधानाचार्यमहोदयाः,
राजकीयः उच्चमाध्यमिकविद्यालयः,
जोधपुरम् ।

**विषयः-क्रीडायाः** सम्यग् व्यवस्थायै प्रार्थना-पत्रम् ।

महोदयः,

सविनयं निवेद्यते यदस्माकं **विद्यालये** क्रीडायाः व्यवस्था भद्रतरा न **वर्तते** । अध्ययनेन समम् एव क्रीडनमपि **अस्मभ्यं** रोचते । अतः क्रीडायाः सम्यग् व्यवस्थां

**विधाय** अस्मान् अनुग्रह्णन्तु **श्रीमन्तः** ।
सधन्यवादम् ।
दिनांकः 25-7-20.......

भवदाज्ञाकारी शिष्यः
हरीशः
(सप्तम् कक्षा)

**6.** सेवायाम्,
श्रीमन्तः प्रधानाध्यापक महोदयाः,
रा. उ. प्रा. विद्यालयः, श्रीकरनपुर ।
**विषयः**- विद्यालये **स्वच्छतायाः** व्यवस्थायै प्रार्थना-पत्रम् ।
महोदयाः,
सविनयं निवेदयामो यद् अस्माकं विद्यालये सम्प्रति अस्वच्छतायाः **साम्राज्यं** वर्तते । अस्मिन् **वातावरणे** छात्राः शिक्षकाश्च रोगग्रस्ता जायन्ते। **अध्ययने** अस्माकं मनांसि न **रमन्ते** । अतः कृपया स्वच्छतायाः समुचित-व्यवस्थायै **कर्मकरान** प्रेरयन्तु अत्रभवन्तः ।
दिनांकः 28-8-20.......

भवताम् आज्ञानुवर्ती
समस्तः **छात्रवृन्दः**

**7.** सेवायाम्,
श्रीमन्तः प्रधानाध्यापक, महोदयाः,
राजकीयः उच्चप्राथमिक **विद्यालयः**,
बीकानेरम् ।
**विषयः**-शैक्षिक-**शिविरस्य** आयोजनार्थं प्रार्थना-पत्रम् ।
महोदयाः,
सविनयं **निवेद्यते** यद् अस्मद्विद्यालये **शिक्षण-व्यवस्था** पूर्णसन्तोषकरी वर्तते । तथापि **अस्माकं ज्ञान-पिपासा** तृप्तिं न एति। अतः प्रार्थयामो **वयं** यद् अस्मत्-कृते 15 दिनात्मकम् एकं शैक्षिक-शिविरम् **आयोज्य** अनुग्रह्णन्तु श्रीमन्तः ।
दिनांकः 18-11-20.......

भवदाज्ञाकारिणः शिष्याः
सप्त कक्षास्थाः छात्राः

**8.** प्रिय अनुज ! व्याबर (अजयमेरु)
चिरंजीव । दिनांकः 3-10-20_ _
अत्र **कुशलं** तत्रास्तु ।
तव एकेन मित्रेण **सूचितं** यत् स्वशिक्षकैः सह तव **व्यवहारः** शिष्टः न अस्ति । **सहपाठिषु** अपि त्वम् असाधुः संवृत्तः **असि** । इदं **नोचितम्।** सदाचारस्तु **जीवनस्य** मूलमन्त्रोऽस्ति । कथितं च **'आचारः'** परमो धर्मः इति । आशासे यत् त्वं मम **परामर्शम्** अनुसरिष्यसि ।
चि. सुरेन्द्रनाथः, कक्षा 8 (स)
राजकीय सी. सै. स्कूल, बाड़मेर ।

**तवाग्रजः**
राजेन्द्रनाथः

**9.** प्रिय मित्र श्याम ।
**नमस्कारः** ।
अत्र कुशलं तत्रास्तु ।
मम वार्षिकी परीक्षा **मार्चमासस्य** पंचविंशतितमे दिनांके **समाप्तिम्** गता । परीक्षानन्तरम् **अहं** शीघ्रमेव गृहं प्रति प्रस्थास्यामि **ग्रीष्मावकाशे** च गृहे एव स्थास्यामि । त्वं गृहं **कदा** आगमिष्यसि ? शीघ्रं सूचय । अहम् **त्वाम्** औत्सुक्येन **प्रतीक्षिष्ये**।
दिनांकः 27-7-20_ _ **भवदीयः**
राजेशः
रा. उ. प्रा. विद्यालयः शाहपुरा (भीलवाड़ा)

**10.** पूज्येषु मातृचरणेषु, 56, आर्यनगर, बून्दीतः
सादरं वन्दे। दिनांक : 9-9-20_ _
भवदीयं **कृपापत्रं** मया अद्य लब्धम्। **अहम्** अत्र **सर्वथा** प्रसन्नोऽस्मि। पूज्येन पित्रा **प्रेषितेन** धनेन मम निर्वाहः **सुखेन** सम्पद्यते। किन्तु पाठ्य-विषयाणाम् **विशिष्ट** अध्ययनाय केषाञ्चित् अतिरिक्त **पुस्तकानां** क्रयणम् आवश्यकम् अस्ति। एतदर्थं चाहं **पञ्चाशत्** रूप्यकाणि अपेक्षे। एतद्धनम् अविलम्बं धनादेश-माध्यमेन **प्रेषयतु,** इति पित्रे निवेदनीयम्। **पितृचरणाभ्यां** मे प्रणामाञ्जलिः स्वीकार्या। अनुजादिकाश्च मे चिरंजीवन्तु इति अभिलषन्।

**प्रतिष्ठायाम्,**
भवत्याः स्नेहभाजनम्
श्रीमत्य आरती
निहालगंज धौलपुरम्।

●●

## पाठ–5 अपठितावबोधनम्

**1.** 1. (क) नृप। (राजा) (ख) पशवः।
2. (क) मक्षिका नृपस्य नासिकायाम् उपाविशत् । (ख) प्रहारस्य नृपस्य नासिका छिन्ना अभवत् फलम् अभवत् ?
3. (क) वानरः (ख) सुप्तः।

**2.** 1. (क) जम्बूवृक्षः (जामुन का पेड़), (ख) वानरः (बन्दर)।
2. (क) वानरः प्रतिदिनं जम्बूफलानि खादति स्म । (ख) जम्बूफलानि खादित्वा मकरस्य जाया अचिन्तयत्– 'अहो यः प्रतिदिनमीदृशानि मधुराणि फलानि खादति, नूनं तस्य हृदयमपि मधुरं भविष्यति ।'
3. (क) अभवत्। (ख) मधुराणि।

**3.** 1. (क) जलाशयम्, (ख) पिपासया।
2. (क) घटे स्वल्पं जलम् आसीत्, अतः काकः जलं पातुम् असमर्थः आसीत् ।
(ख) उद्यमस्य प्रभावेण काकः जल पातुं सफलः अभवत् ।
3. (क) जलम् (ख) स्वल्पम्।

**4.** 1. (क) भोजः (ख) दानशीलता।
2. (क) एकदा माघस्य पत्नी एकां कविताम् आदाय भोजसमीपे अगच्छत् तदा भोजः तस्यै प्रभूतं धनम् अददात् ।
(ख) सा सर्वं धनं याचकेभ्यः वितरितवती।
3. (क) (अ) राजा भोजः
(ख) (अ) दानशीलता।

**5.** 1. (क) ऋषयः (ख) वैरभावम्।
2. (क) तत्र मृगसिंहशिश्वोः कदापि कलहः न अभवत्
(ख) ऋषीणां तपसः प्रभावात् आश्रमस्य पशुपक्षिणश्च तत्र निर्भयं विचरन्ति स्म ।
3. (क) (स) वसन्ति स्म
(ख) (अ) पवित्रम्।

●●

## पाठ–6 संकेताधारिताः वार्त्तालापः

### 1. कक्षायां छात्राणां सम्भाषणम्

प्रदीपः – अरुण ! भवतः **गणितपुस्तकं** ददाति किम् ?
अरुणः – भवान् किमर्थं **विद्यालयं** नागतवान् ?
प्रदीपः – मम अतीव शिरोवेदना आसीत्। अतः शयनं **कृतवान्**।
अरुणः – संस्कृतपुस्तकं भवान् इतोऽपि न दत्तवान्। इदानीं **गणितपुस्तकमपि** नयति, कदा प्रतिददाति ?
प्रदीपः – श्वः सायङ्काले भवतः पुस्तकं **दास्यामि**।
ज्योतिः – प्रदीप ! भवान् असत्यं वदति किम् ? श्वः भवान् बन्धुगृहे **गमिष्यति**। परश्वः आगमिष्यति। कदा गणितं लेखिष्यति ?
प्रदीपः – अहं विस्मृतवान्। परश्वः निश्चयेन **पुस्तकं** दास्यामि।
कृष्णः – ज्योति ! अद्य मम गृहम् आगच्छतु। सम्यक् **पठिष्यावः**।
अरुणः – भवान् पठिष्यति, लेखिष्यति इति वदति केवलम्।
कृष्णः – शिक्षिका श्वः संस्कृतपाठं पाठयिष्यति। **द्वितीयपाठस्य** प्रश्नान् प्रक्ष्यति। रिक्तस्थानानि पूरयन्तु इति वदिष्यति। अतः बहु पठिष्यामि।
अरुणः – भवन्तः मम गृहम् आगच्छन्तु। सर्वे मिलित्वा **पठिष्यामः**।
ज्योतिः – भवन्तौ द्वौ अपि मिलतः चेत् न पठिष्यतः, युद्धं करिष्यतः। अतः स्वगृहे एव पठेताम्।

## 2. प्रीत्या व्यवहरताम्

आदित्यः – अनुराग ! भवान् तत् **पुस्तकम्** आनयतु।
अनुरागः – अहं न आनयामि। **आवश्यकं** चेत् नयतु।
आदित्यः – भोः ! भवान् कदा **सन्तोषेण** वदति ? सदा कोपं करोति।
अनुरागः – त्वमपि कदापि प्रीत्या न वदसि। आदेशं **करोषि**।
आदित्यः – सदा श्रद्धया कार्यं करोतु। विनयेन **सम्भाषणं** करोतु।
अनुरागः – गच्छ त्वम्। सदा **उपदेशं** करोषि।
माता – किमर्थं कोपेन सह कलहं कुरुतः ? भवन्तौ सहोदरौ न किम्? आदित्यः ! त्वं कोपेन मा तर्जय, सः दुःखेन रोदिति। सदा प्रीत्या **व्यवहरताम्**।
आदित्यः – अम्ब ! क्षम्यताम्। इतः परं **सन्तोषेण** एव भवावः।
अनुरागः – अम्ब ! अद्य मम विद्यालये एकः बालकः भीतिं कृतवान्। शिक्षिका प्रीत्या सान्त्वनां कृतवती। अनन्तरं सः आनन्देन निर्भयेन **पठितवान्**।
माता – अस्तु, भवन्तौ अपि एकाग्रचित्ततया पठताम्, श्रद्धया नमस्कारं कुरुताम्, **परिश्रमेण** उत्तमान् अङ्कान् प्राप्नुताम्। (तदा) अहमपि सन्तुष्टा भवामि।
आदित्यः – अस्तु अम्ब ! तथैव कुर्वः।

●●

# पाठ-7 लघु कथा लेखनम्

### 1. सिंहमूषकयोः कथा

कस्मिंश्चिद् वन-प्रदेशे एकः **सिंहः** प्रतिवसति स्म। एकदा सः वृक्षस्य छायायां **स्वपिति** स्म। तस्य वृक्षस्य **अधस्तात्** एकः मूषकः बिलं **कृत्वा** वसति। सः मूषकः बिलात् **निस्मृत्य** सुप्तस्य सिंहस्य **पृष्ठमारुहय** तस्य केशान् कृन्तति स्म। जागृतः सिंहः मूषकं **हस्ते** गृहीत्वा अवदत् 'कोऽसि? कथं मे **केशान्** कृन्तति? अहं त्वां **हनिष्यामि**। मूषकोऽपि भीतः सन् न्यवेदयत्—अहं छुद्रमूषकः सन् अपि **भवतां** सहाय्यं कर्तु प्रतिज्ञां करोमि। दयार्द्र सिंहः तम् उपहसन् अत्यजत्।

एकदा सिंहः बधिकैः पाशे निबद्धः। स उच्चैः **अगर्जत्**। मूषकः सिंहमापन्नं **ज्ञात्वा** तत्रैव प्राप्नोत्। सः तस्य जालं छित्वा तं पाश **मुक्तम्** अकरोत्। मुक्तः सिंहः मूषकेन सह मैत्रीं **विधाय** स्वच्छन्दं विचरति स्म।

### 2. चतुरः श्रृगालः

कस्मिंश्चिद् वन-प्रदेशे एकः **व्याघ्रः** वसति स्म। एकदा असौ **बधिकेन** पञ्जरे बद्धः। व्याघ्रः पाशे खिन्नः सन् स्थितः। ततोऽसौ मार्गे **विप्रमेकं** गच्छन्तम् अपश्यत्। व्याघ्रः **ब्राह्मणाय** न्यवेदयत्—'मां मोचय।' दयार्द्रः ब्राह्मणः व्याघ्रे **दयमानः** तं **मोचयित्वा** सहाय्यमकरोत्। परञ्च हिंसकः व्याघ्रः तु कृतघ्नः आसीत्। सः विप्रं **खादितुमैच्छत्** विप्रः तं स्वजीवनं **याचमानः** न्यवेदयत्—'हे मृगराज! मा माम् **व्यापदय** माम् मा भक्षय। कृतज्ञो भव। परञ्च **निर्दयः** व्याघ्रः नाशृणोत्। तदैव तत्र एकः **शृगालः** आगच्छत्। सोऽवदत्—नाहं मन्ये यत् त्वं **विशालकायः** अस्मिन् लघु पञ्जरे बद्धः आसीत्। अतः पुनः प्रविश्य मां दर्शय व्याघ्रः यावत् पुनः **प्रविश्य** दर्शयति तावत् श्रृगालः **कपाटं** व्यपदघात्। एवं व्याघ्रं पञ्जरे पुनः निक्षिप्य विप्रं रक्षति।

### 3. चतुरः गर्दभः

कस्यचिद् **मनुष्यस्थ** गृहे एक गर्दभः आसीत्। सः तस्य पृष्ठे **लवणम्** नयति स्म। सः सदैव नद्याः **पारं** नयति। एकदा **जलमध्ये** तस्य पादम् अस्खलत्। सः जले अपतत्। लवणः जले **विलीयते** स्म। गर्दभः इदं तथ्यम् अजानत्।

यत् यथा यथा लवणः जले विलीयते तथा तथा एव भारमपि **अल्पताम्** आप्नोति। एतद् ज्ञात्वा गर्दभः **नित्यमेव** सरितः जले पतति भारं च **अल्पतरम्** करोति। एकदा सः **मनुष्य** तस्य पृष्ठे तूलं (कर्पासं) अनयत्। गर्दभः **नित्यमिव** जले अपतत्। जलं **संग्रहणात्** तस्य भारमतितरमभवत्। भारस्य आधिक्यात् गर्दभः **उत्थातुमपि** असमर्थो अपतत्। यत्नेन उत्थाय अपि **चलितुमसमर्थः** अजायत्। असमर्थो असौ भारेण **पीड़ितः** स्वामिना **प्रताड़ितः** ताडितः। वराकः गर्दभः धूर्तताम् अत्यजत्।

**4. गज सौचिकयोः कथा**

केनचिद् मनुष्येण **एकः** गजः पालितः आसीत्। सः जलं पातुं स्नातुं च नित्यमेव **नद्यास्तटं** गच्छति स्म। मार्गे एकस्य सौचिकस्य आपणि आसीत् । सः तस्मै किमपि **खादितुं** यच्छति स्म। सः वस्त्राणि सीसति स्म। आपणेऽनेकानि **स्यूतानि** वस्त्राणि अवलम्बितानि आसन्। एकदा **असौ** सौचिकः परिहासे गजस्य करे **सूचिम्** अभिनत्। क्रुद्धः सन् गजः नद्याः तटमगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकीये करे (शुण्डे) पङ्किलं जलमानयत्। **सौचिकस्यापणमागत्य** नव स्यूतेषु महार्धेषु वस्त्रेषु असिंचत्। **सौचिकः** किमपि न कर्तुमशक्नोत्। पश्चात्ताप **निमग्नोऽसौ** गजं क्षमामयाचत। आत्मग्लानिमनुभूय अति खिन्नोऽभूत्।

**5. लुब्धः जम्बुकः**

एक**ः बधिकः** आसीत्। सः वनम् उपवसति स्म। **मांस** लुब्धोऽसौ व्याधः एकदा धनुरादाय **मृगयार्थ** मृगमन्विष्यन् काननान्तरम् अगच्छत्। तत्र तेनै को मृगः व्यापादितः। मृगमादाय गच्छता तेन घोराकृतिः **शूकरो** दृष्टः। सः मृगं भूमौ निधाय शरेण शूकरमहनत्। शूकरः गर्जनं कुर्वाण **पादाघातेन** तमाहतवान्। व्याधः हतः छिन्न द्रुम इव पपात। तस्य पादस्खलितेन एक सर्पः अपि मृतः। मृते **व्याधे** तत्रागत एकः शृगालः। सः तान् **मृतानवलोक्य** प्रसन्नोऽभवत्। सोऽचिन्तयत— 'अहो ! भाग्यम्, अद्य महद् भोजनं मे **समुपस्थितम्**। अद्य तु धनुलग्नं स्नायुबन्धनमेव खादामि।' एवं कुर्वन्नसौ छिन्ने **स्नायुबन्धने** द्रुतम् उत्प्लुतेन कोरण्डेन हृदिभिन्नः शृगालः पञ्चत्वं गतः।

●●

## पाठ-8 कथाक्रम-संयोजनम्

**1.** 1. एकः पिपासितः काकः आसीत्।
2. सः वने एकं घटम् अपश्यत्।
3. घटे जलम् अल्पम् आसीत्।
4. तस्य मस्तिष्के एकः विचारः समागतः।
5. सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम्।
6. जलं पीत्वा काकः ततः अगच्छत्।

**2.** 1. एकस्मिन् वने एकः सिंहः वसति स्म।
2. एकदा सः जाले बद्धः।
3. सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।
4. तदा तस्य स्वरं श्रुत्वा एक मूषकः तत्र आगच्छत्।
5. मूषकः परिश्रमेण जालम् अकृन्तत्।
6. सिंहः जालात् मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।

**3.** 1. एकदा कश्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।
2. सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।
3. तदा सः नदीजले स्वप्रतिबिम्बम् अपश्यत्।
4. स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।
5. सः कुक्कुरः रोटिकां प्राप्तुं तेन सह युद्धार्थं मुखम् उद्घाटयति।
6. तदा तस्य मुखस्था रोटिका अपि जले पतति।

**4.** 1. एकः बुभुक्षितः शृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।
2. एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।
3. लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।

4. तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।
5. परं तथापि द्राक्षाफलानि न प्राप्नोत्।
6. 'तानि द्राक्षाफलानि अम्लानि' इति उक्त्वा कुपितः शृगालः ततः गतः।

**5.** 1. एकः गजः आसीत्।
2. सः जलं पातुं स्नातु च प्रतिदिनं सरितः तटम् अगच्छत्।
3. एकदा सौचिकस्य पुत्रः गजस्य करे सूचिकाम् अभिनत्।
4. क्रुद्धः सन् गजः सरितः तटम् अगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकरे पङ्किलं जलम् आनयत्।
5. सौचिकस्य आपणे स्यूतेषु वस्त्रेषु असिंचत्।
6. तदा सौचिकस्य पुत्रः आत्मग्लानिम् अनुभूय अतिखिन्नः अभवत्।

●●